(शतकोटीय-पद्धति सहिता)

॥ अथ शिव सपर्या विधिः प्रारम्भः ॥

नवरात्रौ - श्री चक्र पूजा विधिः ।

॥ अथ शिवपूजाविधानम् ॥

तत्रादौ शैवागमोक्ता शैवी षडङ्ग मुद्रा लिख्यते ॥ ॥

" कृतमुष्टिपुटै हस्तौः कृत्वाऽङ्गुष्ठौ हृदि न्यसेत ॥ हृन्मुद्रेयं समाख्याता शिरो
मुद्रा प्रकीर्त्यते ॥ १ ॥ ललाटाग्रे समाधाय कृतमुष्टिपुटौ करौ ॥ कुर्यादूर्ध्व प्रस-
क्ताग्रे तर्जन्यौ ज्येष्ठ बाह्यतः ॥ २ ॥ करौ शिखायां संयोज्य कृतमुष्टिपुटाकृती ॥
ज्येष्ठावधः प्रसक्ताग्रौ कनिष्ठे चोर्ध्वतस्तथा ॥ ३ ॥ कुर्यात्सेयं शिखामुद्रा सर्वो-
पद्रव नाशिनी ॥ कृत्वाऽङ्गुष्ठौ प्रसक्ताग्रौ तर्जन्यौ च त्रिकोणवत् ॥ ४ ॥
मूर्ध्नि पश्चान्मुखे कृत्वा नयेदुभयपार्श्वतः ॥ करौ हृदन्ते मुद्रेयं कवचस्याऽ
भयप्रदा ॥ ५ ॥ कृत्वा नेत्रोन्मुखं हस्ते सक्ताङ्गुष्ठकनिष्ठिकाम् ॥ प्रसार्य मध्यमा-

किञ्चिन्नमयेदितराङ्गुलीः ॥८॥ नेत्रमुद्रेयमुद्दिष्टा रक्षोभूतार्तिभञ्जिनी ॥
परस्परतलद्वन्द्वैः पुनरास्फोटयेद् भृन्दाम् ॥७॥ अस्त्रमुद्रेयमुदितासर्वविघ्नविनाशिनी ॥" इति ॥

॥ अथ भस्म धारण विधिः ॥ तद्यथा –

सद्योजातमित्यादीनां पञ्चानां क्रमेण सद्योजात-वामदेवाऽघोर-तत्पुरुषेशाना ऋषयः त्रिष्टु-
ब्जगत्यनुष्टुब्गायत्र्यनुष्टुभश्छन्दांसि ब्रह्म-विष्णु-रुद्रा देवताः भस्मपरिग्रहणे विनियोगः ॥
"ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ॥ भवे भवे नातिभवे भवस्व माम्भवोद्भवाय नमः ॥१॥
वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो-
बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥२॥

अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥३॥
तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥४॥ ईशानः सर्व- ×-
विद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोऽम्॥५॥

(एभिः पञ्चाभिर्मन्त्रै भस्म मादाय वामकरे निधाय दक्षिणकरेणाऽऽच्छादयेत॥) ततः - अग्निरित्यादीनां-
पिप्पलाद ऋषिः गायत्री छन्दः कालाग्नि रुद्रो देवता भस्माभिमन्त्रणे विनियोगः॥ "ॐ अग्निरिति-
भस्म, वायुरिति भस्म, जलमिति भस्म, सर्वं ह वा इदं भस्म, मन इत्येतानि चक्षूंषि भस्मानि, तस्मा-
द्व्रतमेतत्पाशुपतं यद्भस्मनाङ्गानि संस्पृशेत्तस्माद्व्रतमेतत्पाशुपतं पशुपाशविमोक्षाय॥१॥"
इति मन्त्रेण त्रिः कृत्वो भस्माभिमन्त्रयेत॥ ततः - आपोज्योतिरित्यस्य प्रजापति ऋषिः यजुश्छन्दः -
ब्रह्माग्नि वायुसूर्या देवताः भस्मन्यपामासेचने विनियोगः। ॐ आपो ज्योतिरसोऽमृतं ब्रह्म भूर्भुवःस्वरोम्॥"
इति मन्त्रेण "ॐ नमः शिवाय" इत्यनेन वा भस्मन्यपामासिच्य "ॐ ईशानः सर्वविद्यानाम्" इति शिरसि॥
×

"ॐ तत्पुरुषाय" इति मुखे ॥ "ॐ अघोरेभ्यः" इति हृदये ॥ "ॐ वामदेवाय" इति गुह्ये ॥ "ॐ सद्योजातं प्रपद्यामि" इति पादयोः, "ॐ" इत्यनेन मस्तकात्पादतलपर्यन्तमिति भस्मधारणविधिः ॥ अथ रुद्राक्षधारणविधिः ॥ ÷

ततो रुद्राक्षमालां गृहीत्वा ÷ "ॐ हृत्पुण्डरीकं विरजं विशुद्धं, विचिन्त्य मध्ये विशदं विशोकम् ॥ तथाधिमध्यान्तविहीनमेकं, विभुं चिदानन्दमरूपमद्भुतम् ॥" इति ध्यात्वा ततः ÷ —

"ॐ त्र्यंबकं यजामहे सुगन्धिम्पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्" इत्यनेन ("ॐ नमः शिवाय" इति वा) रुद्राक्षधारणं कुर्यात् ॥ ÷

॥ रुद्राक्षान् कण्ठदेशे दशनपरिमितान् ३२, मस्तके विंशतिर्द्वे, ४०। षट् षट् कर्णप्रदेशे ६, करयुगलकृते द्वादश-द्वादशैव १२, ॥ बाह्वोरिन्दोः कलाभिः १६, नयनयुगकृते एकमेकं शिखायाम् १, ॥ वक्षस्यष्टाधिकं १०८, यः कलयति शतकं सः स्वयं नीलकण्ठः ॥ १ ॥

(अङ्गन्यासे वक्ष्यते ÷) ॐकारं मूर्ध्नि विन्यस्य नकारं नासिकाग्रतः ॥ मोकारं तु ललाटे वै भकारं मुखमध्यतः ॥ १ ॥ गकारं कण्ठदेशे च वकारं हृदये न्यसेत् ॥ तेकारं दक्षिणे हस्ते वामे रुकारमेव च ॥ २ ॥ द्राकारं नाभिदेशे च यकारं पादयोर्द्वयोः ॥ इति (तच्चया अग्रेऽवलोकनीयः क्रमेण) ÷

॥ अथ प्रयोगः ॥

तत्रादौ पूर्वाह्णे स्नातः कृत नित्यक्रियः शुचिः पवित्र-पाणिरुदङ्मुखो बद्धशिखः सुप्रक्षालित पाणि पादः सव्ये-
पाणौ कुशोत्तर कम्बलाद्यास्तृते स्वासने, उपविश्य, तत स्मार्तेन। विधिनाऽऽचम्य, कुश यव तिल जलान्यादाय :-
"ॐ अद्यामुक मासीयामुकपक्षीयामुक तिथावमुक गोत्रस्यामुक गोत्रोत्पन्नस्यामुक शर्माऽहं अमुक काम:
शुक्ल यजु र्वेदान्तर्गत माध्यन्दिन शाखीय षडङ्ग शतरुद्रियेणामुक [द्रव्येणामुक] शिवलिङ्गोपरि स्नपनमहं करिष्ये॥
(गन्ध-पुष्पादि सामग्रीं …… जलं पात्राणि स्वकीय दक्षिण पा … घण्टा ऽर्घ्यञ्च वामे संस्थापयेदिति विशेषः)

ततो ध्यानम् - ("ॐ वृं नन्दि …… नमः॥ ॐ वीं वीर भद्राय नमः॥ ॐ कां कार्तिकेयाय नमः। ॐ कुं कुबेराय नमः॥
"ध्यायेन्नित्यं महेशं रजत गिरिनिभं चारु चन्द्रावतंसम्, ॐ भैं कीर्तिमुख भैरवाय नमः॥)
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीति हस्तं प्रसन्नम्।
पद्मासीनं समन्तात्स्तुतममरगणै र्व्याघ्रकृत्तिं वसानम्,
विश्वाद्यं विश्ववीजं निखिल भयहरं पञ्च वक्त्रं त्रिनेत्रम्॥१॥
"इदं ध्यान पुष्पं ॐ भूर्भुवः स्वः साम्ब सदाशिवाय नमः" इति ध्यात्वा :- ॥अङ्ग न्यासः॥ ॐ वामदेवाय ऋषये नमः-
इति शिरसि। ॐ अनुष्टुप्छन्दसे नमः - मुखे॥ ॐ सदाशिवाय नमः - हृदि॥ ॐ बीजाय नमः - गुह्ये॥
ॐ शक्तये नमः पादयोः॥ ॐ शिवाय ते कीलकाय नमः सर्वाङ्गे॥ ॐ नं तत्पुरुषाय नमो हृदये॥ ॐ मं
अघोराय नमः पादयोः॥ ॐ शिं सद्योजाताय नमो गुह्ये॥ ॐ वां वामदेवाय नमो मूर्ध्नि॥ ॐ यं ईशानाय नमो मुखे॥
ॐ ॐ अङ्गुष्ठाभ्यां नमः॥ ॐ नं तर्जनीभ्यां स्वाहा॥ ॐ मं मध्यमाभ्यां वषट्॥ ॐ शिं अनामिकाभ्यां हुम्॥ (क्र॥ / वाम पार्श्वे पुष्पव्यास (क))
"ॐ एतत्ते रुद्रावसन्तेन परो मूजवतोऽतीहि। अवततधन्वा पिनाकावसः कृत्तिवासा-
ऽअहिᳬसन्नः शिवोऽतीहि॥" "सिंहासने कनकरत्नमणिप्रभास्वत्, छत्रध्वजाङ्कसित चामर तोरणाढ्ये।
बालार्क कोटि सदृशं कनकाम्बराढ्यं, श्री शंकरेच मनसैव मयार्पितं ते॥ इदमासनं (वाम भागे देयम्)
ॐ भूर्भुवः स्वः साम्बसदाशिवाय नमः॥ (२) ततः सघण्टानादं पाद्यम् :- "ॐ नमोऽस्तु नीलग्रीवाय
सहस्राक्षाय मीढुषे। अथो ये ऽअस्य सत्वानोऽहं तेभ्योऽकरं नमः॥"
"दुर्वाङ्कुराम्बुज मनोहर पुष्प युक्तं,
शुद्धं जलं सुरभि-चूर्ण समन्वितं च।
सौवर्ण पात्र (ताम्रपात्र) विलसत्पदयो र्विशुद्धं,
पाद्यं गृहाण जगदीश मयार्पितं ते॥" इदं पाद्यं ॐ भूर्भुवः स्वः साम्बसदा
शिवाय नमः॥ ततोऽर्घ्यम् (शिरसि देयम्)

(क)॥ ॐ वं कनिष्ठिकाभ्यां वौषट्॥ ॐ यं करतल कर पृष्ठाभ्यां फट्॥ ॐ ॐ हृदयाय नमः॥
॥ ॐ नं शिरसे स्वाहा॥ ॐ मं शिखायै वषट्॥ ॐ शिं कवचाय हुम्॥ ॐ वां नेत्रत्रयाय वौषट्॥
॥ ॐ यं अस्त्राय फट्॥ पुष्पमादाय :- ॐ स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्॥
॥ तावत्त्वं प्रीतिभावेन देवेऽस्मिन् सन्निधिं कुरु॥ शक्ति मुद्रां प्रदर्श्य पुष्पं समर्प्य तत्तोऽष्टोत्तरशत
संख्याकां रुद्र गायत्रीं जप्त्वा तद्भस्माप्य अन्येषाऽऽसनं समर्पयेत्।

१ गव्यो
१ आज्यम्
२ दधि
३ क्षीरं
४ माक्षिकम्
२ शर्करान्वितम्
एकत्रमिलितं ज्ञेयं
पञ्चामृतं परम्।

"ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्"। "सौवर्णपात्ररचितं
फलपुष्पमर्घ्यं, तं तं गृहाण मनसाऽर्पितमिन्दुमौले। दूर्वायवाक्षतसुगन्धिहिरण्यरत्न--
दर्भाम्बुजं त्रिपथगाजलपुष्पयुक्तम्॥" **इषोऽर्घः** ॐ भूर्भुवः स्वः साम्बसदाशिवाय नमः॥

पञ्चामृतम्÷ (३) "ॐ पञ्च नद्यः÷ सरस्वतीमपि यान्ति सस्रोतसः। सरस्वती तु पञ्चधा सो
देशेऽभवत्सरित्"॥ "तोयैश्च दुग्धदधिमाक्षिकसर्पिराढ्य-सीतायुतैः कनककुम्भ-
धृतैः समन्त्रैः। कर्पूरकेसरसुगन्धिभिरिन्दुमौले-स्नानार्थमर्पितमिदं विधिवद्गृहाण॥"
इदं पञ्चामृतं ॐ भूर्भुवः स्वः साम्बसदाशिवाय नमः॥ **ततआचमनीयम्**÷ (४)
"त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥"

"श्रीजाह्नवीजलमयं सरसं सुधाव, च्चैलालवङ्ग० शुभगन्ध मनोऽभिरामम।
गौरीपते कनक पात्र धृतंमयाते, भक्त्याऽर्पितं सुरुचिर माचमनं गृहाण"॥

इदमाचमनीयं ॐ भूर्भुवः स्वः साम्ब सदाशिवाय नमः। ततः शुद्धोदकस्नानम् :- (५)

"ॐ शुद्धवालः सर्व्व शुद्धवालो मणिवालस्त ऽआश्विनाः श्येतः श्येताक्षो ऽरुण-
स्ते रुद्राय पशुपतये कर्णा यामा ऽ अवलिप्ता रौद्रा नभो रूपाः पार्जन्याः"॥

"श्रीजाह्नवीजलमयं सरसं सुधाव, च्चैलालवङ्ग० शुभगन्धमनोऽभिरामम।। गौरीपते कनक-
पात्र धृतंमयाते. (~~भक्त्याऽर्पितं सुरुचिर माचमनं गृहाण~~") स्नानं गृहाण जगदीश मयार्पितं ते॥"

इदं शुद्धोदकस्नानं ॐ भूर्भुवः स्वः साम्बसदाशिवाय नमः॥" ततः कटिबन्ध वस्त्रम् :- (६)

"ॐ मा नस्तोके तनये मा न ऽआयुषि मानो गोषु मा नो ऽ अश्वेषु रीरिषः। मा नो वीरा-
न्रुद्र भामिनो वधी र्हविष्मन्तः सदमित्त्वा हवामहे॥" ÷

"कौशेयवस्त्रयुगलं कनकैर्विचित्रं, बालार्ककोटिसदृशं च मनोऽभिरामम्।
भक्त्या मयाऽर्पितमिदं परिधाय शम्भो, सिंहासने त्वमुपविश्य गृहाण पूजाम्॥"
इदं श्वेतवस्त्रं बृहस्पतिदैवतं ॐ भूर्भुवः स्वः साम्बसदाशिवाय नमः। अथो त्तरीयम् — (७)
"ॐ नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायु-
धिने च नमः स्वायुधाय च सुधन्वने च॥" इदमुत्तरीयवस्त्रं बृहस्पतिदैवतं ॐ भूर्भुवः स्वः
साम्बसदाशिवाय नमः। ततः — "यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥"

"दत्तं मया सुमनसा वचसा करेण, यद्ब्रह्मवर्चसमयं परमं पवित्रम्॥
यत्कर्मकर्मनिलयं परमायुरेतद्, यज्ञोपवीतमुररी कुरु हे महेश॥"
इमे यज्ञोपवीते बृहस्पतिदैवते ॐ भूर्भुवः स्वः साम्बसदाशिवाय नमः॥

ततश्चन्दनम् :- (अनामिकया)

ॐ नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च" ॥

"यन्द्रैष्ठमौस्ते मलयाचल चन्दनानां, कर्पूर केसर सुगन्धि रसेन घृष्टम् ।
आमोदमान मानितं मनसा धृतं यत्, तच्चन्दनं त्रिपुरभैरव दीनबन्धो ॥"
रदमनुलेपनं ॐ भूर्भुवः स्वः साम्बसदाशिवाय नमः ॥ ततोऽक्षताः ※

"ॐ नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः"
श्वेतैरखण्डित मनोहर शालिबीजैः, सौक्षादितैः शुचिजलैश्च सुगन्धमिश्रैः ।
त्वामर्चयामि भगवन् मनसा महेश, गौरीपते मयि निधेहि कृपाकटाक्षम् ॥"
एताऽक्षता ॐ भूर्भुवः स्वः साम्बसदाशिवाय नमः ॥

※ अक्षतास्तु यवाः प्रोक्ता अभावे व्रीहयः स्मृताः ।
तदभावे च गोधूमा न तु खण्डिततण्डुलाः ॥"
- इति परशुरामः -

11) ततः पुष्पमाल्यम् :

(48)

"बिल्वैश्च चम्पकमनोहर जातिपुष्पै, र्मन्दार पङ्कज जवा तुलसी दलैश्च।
सम्भावितेऽक्षा कनक पुष्पवरैर्मयाते, सम्पूजितो भव विभो हि कृपा कटाक्षम्॥"
एतानि पुष्पाणि ॐ भूर्भुवः स्वः साम्ब सदाशिवाय नमः॥ इदं पुष्प माल्यं गन्धर्व दैवतं ॐ भूर्भुवः स्वः -
साम्ब सदाशिवाय नमः॥ इति पुष्प माल्यं दद्यात्॥ ततः पुष्पाणि :—— (यथोपलब्धं तथैव देयम्)
नमः पार्थ्याय चावार्थ्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च
नमः शष्प्याय च फेन्याय च॥ एतानि पुष्पाणि ॐ भूर्भुवः स्वः साम्ब सदाशिवाय नमः॥
ततो बिल्व पत्र समर्पणमाभ्यां ॐ नमः पर्णाय च पर्णशदाय च नमऽ उद्गुरमा
णाय चाभिघ्नते च नमऽ आखिदते च प्रखिदते च नमऽ इषुकृद्भ्यो धनुष्कृद्
भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाᳯ हृदयेभ्यो नमो विचिन्वत्केभ्यो
नमो विक्षिणत्केभ्यो नमऽ आनिर्हतेभ्यः"॥ ÷

"त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम्।
त्रिजन्म पाप संहारं बिल्वपत्रं शिवार्पणम्।" एतानि बिल्वपत्राणि ॐ भूर्भुवः स्वः साम्बसदाशिवाय नमः॥ ततो धूपम् :- ॐ नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च"। "कालागरोश्च घृत मिश्रितगुग्गुलस्य,

धूपो मया विरचितो भवतः पुरस्तात्।
आघ्राय तं शुचि मनोहर गन्धपूर्णं
त्वं विनाशय महेश्वर मोहजालम्।"

एषः धूपः ॐ भूर्भुवः स्वः साम्बसदाशिवाय नमः॥ (पुरोभागे दद्यात्) ततोदीपञ्च तथैवः- "ॐ नम ऽ आशवे चा ऽजिराय च नमः शीघ्र्याय च शीभ्याय च नम ऽ ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च"। "पूर्णं घृतेन गिरिजेश सुवर्णपात्रे, कौसुम्भसूत्र दृढवर्ति विराजमानः। दीपः पुरस्तात् मया रचितो य एष, शीघ्रं विनाशयतु मे दुरितान्धकारम्।"

एवदीप: ॐ भूर्भुवः स्वः साम्ब सदा शिवाय नमः ॥ ततो नैवेद्यं पुरतो धृत्वा ॥ ॐ नमः शिवाय (५६)
इति सम्प्रोक्ष्य ॥ ॐ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च
नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च ॥ ∴
" जिह्वासुधाकनकपात्रविराजमान, मन्नादिकं मधुर शाक फलावली कम् ॥
पन्चामृतप्लुत मनेकविधं मयाते सङ्कल्पितं त्वमुररी कुरु हे महेश ॥
एतानि नाना विध नैवेद्यानि ॐ भूर्भुवः स्वः साम्ब सदा शिवाय नमः ॥ ततः पुनराचमनीयम् ∴
"ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥
इदं पुनराचमनीयं ॐ भूर्भुवः स्वः साम्ब सदा शिवाय नमः ॥ ततः — फलम्
"ॐ याः फलिनी र्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पति प्रसूतास्ता
नो मुञ्चन्त्वᳪ हसः ॥ ∴ इदं फलं ॐ भूर्भुवः स्वः साम्ब सदा शिवाय नमः ॥

ताम्बूलम् :–

"पूगैः सचूर्णखदिरैर्नवजातिपत्रैः, जातिफल त्रुटि लवङ्ग घन प्रपूर्णैः।
ताम्बूलकं तु मनसा वचसा धृतं यत्, तत्स्वीकुरु प्रमथनाथ मया महेश॥"

इदं ताम्बूलं ॐ भूर्भुवः स्वः साम्ब सदाशिवाय नमः॥ पुष्पाञ्जलिः :–

"ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात॥
सम्बाहुभ्या–धमति सम्पतत्रै द्यावा भूमी जनयन्देवऽ एकः॥"

"वेदैः पुराणपटलैर्बहुशास्त्रविद्भिः, मां नैस्त्वमेव कथितैः खलु भिन्नवृत्त्या॥
तुभ्यं तदेव गिरिजापते सुखत्त्वा, तस्मै नमामि सततं परमेश्वराय॥" एष पुष्पाञ्जलिः ॐ भूर्भुवः स्वः साम्ब सदाशिवाय नमः। ततो नीराजनम् :– (कर्पूर दीपः)

"ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः। यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽ अस्मिन्ननातुरम्॥" "कर्पूरखण्डपरिकल्पित पञ्चदीपैः, एनद्र मौलिमुकुट-द्युति सम्प्रदीप्तैः। नीराजितं त्रिजगदेकगुरो मया ते, पादाम्बुजे दिशतु वाञ्छित कार्यसिद्धिम्॥"
एषः कर्पूरदीपः ॐ भूर्भुवः स्वः साम्ब सदाशिवाय नमः॥

ततः प्रार्थना — (आदौ कर्मप्रसङ्गात्कल्पयति कलुषं मातृकुक्षौ स्थितं मामित्यादिकं पठित्वा) वा

"पापानि मे बहुविधानि भयानि यानि, (40)
प्राक्कोटि जन्म दुरितानि च यानि यानि।
शम्भो प्रदक्षिणपदेषु-पदेषु नाथ, शीघ्रं
विनाशय विनाशय ~~दुरितानि तानि~~ हे महेश्वर ॥" इत्यनेन अथवा

"यानि कानि च०" इत्यनेन शम्भोर्वा प्रदक्षिणां कुर्यात् ॥ इति षोडशोपचार पूजाविधिः ॥

ततः शिवलिङ्गोपरि पश्चात् सन्ततं धारापातं तथा सच्छिद्र कलशं गवशृङ्गं वा यज्ञोपवीतादिभिः ऊर्ध्व त्रिपदिकोपरि संस्थाप्य तस्मिन् गङ्गाजलं अन्य जलादिकं वा प्रक्षिप्य, न्यासं कुर्यात्। तद्यथा —(प्रतिमादौ)

"ॐ मस्तके ब्रह्मा तिष्ठतु। ॐ पादयोर्विष्णुस्तिष्ठतु। ॐ हृदये शिवस्तिष्ठतु। ॐ हस्तयोर्हरिस्तिष्ठतु।
ॐ नासिकयोर्वायुस्तिष्ठतु। ॐ नयनयोश्चन्द्रादित्यौ तिष्ठताम्। ॐ कर्णयोरश्विनौ देवौ —

तिष्ठेताम। ॐ ललाटे महादेवस्तिष्ठतु। ॐ पृष्ठे पिनाकी तिष्ठतु। ॐ पुरतः शूली तिष्ठतु।
ततो बहिः — ॐ सर्वतोऽग्निज्वाला मालापरिवृतास्तिष्ठन्तु। ॐ सर्वेषु अङ्गेषु —
सर्वा देवतास्तिष्ठन्तु मां रक्षन्तु इति सर्वाङ्गे। अथैनं गन्धाक्षतादि धूपदीपैः प्रसादयेत्।
" आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः। आराधयामि भक्त्या त्वाऽनुगृह्णाण महेश्वर"।
इति प्रसाद्य। ॐ भवे भवे नाति भवे भवस्व माम्" इति पाद्यं समर्पयामि। ॐ भवोद्भवाय नमः "स्नानीयं समर्पयामि।। (अथाद्भिस्तर्पयेत् — भवं देवं तर्पयामि। शर्वं देवत०। ईशानं दे०।
पशुपतिं दे०। रुद्रं दे०। उग्रं देवं त०। भीमं दे०। महान्तं दे०। इति तर्पयित्वा, "ज्येष्ठाय नमः" इति आचमनीयम् ("श्रेष्ठाय नमः" इति मधुपर्कम्। "कलाविकरणाय नमः" इति पुष्पाणि।
"सर्वभूतदमनाय नमः" इति धूपम्। "मनोन्मनाय नमः" इति दीपम्") तर्पणादिकं सर्वं मनसैव कार्यम्।
नैवेद्यनिवेदनन्तु न शास्त्रसम्मतमस्यां पूजायाम्। शान्तिसार शान्तिकमलाकरादौ तथाविधानात्

ततो ध्यानम् :-

॥ "पञ्चास्यं सौम्य मात्मानं सर्वाभरण भूषितम्॥ मृगलाञ्छन मूर्धानं शुद्धस्फटिकसन्निभम्॥१॥ (६०)

॥ फणासहस्रद्युस्फूर्ज द्भुजगेन्द्रोपवीतिनम्॥ सप्तार्चिर्विज्वलज्ज्वाल जटाजूटकिरीटिनम्॥ २॥

॥ सहस्रकर विभ्राजद् खट्वाङ्गादि-विभूषितम्॥ ब्रह्माण्डखण्डवत्काल कपालवर धारिणम्॥ ३॥

॥ देदीप्यमानं चन्द्रार्कं ज्वलदग्नि त्रिनेत्रिणम्॥ त्रैलोक्य द्योतिकृद्भास्वत्स्कन्धे कपालमालिनम्॥४॥

॥ दीप्त नक्षत्र मालाव दक्षमालाधरं द्विजा:॥ नि:शेष वारिसम्पूर्णं कमण्डलुकरं त्वजम्॥ ५॥

॥ जगद्भाधीयक्रन्नादमुच्चै:डमरु धारिणम्॥ केयूरवद्भुजनागेन्द्र मूर्धामणि विराजितम्॥ ६॥

॥ मेखला किङ्किणीमाला मुक्तारव विराजितम्॥ घर्घर व्यक्त निगच्छद् गम्भीर रावनूपुरम्॥

॥ व्याघ्रचर्म परीधानं व्याघ्र-चर्मोत्तरीयकम्॥ विद्युल्लताप्रभागङ्गा भालमूर्ध सुराचितम्॥ ७॥

॥ समस्त भुवनाधार धारणोद्भासन स्थितम्॥ त्रैलोक्यवनिता मूर्धं भ्रान्तदेहार्ध पार्वती॥ ८॥

समाकुलम्॥

॥ लक्षणं सूर्यभां भास्वरं त्रैलोक्य कृत पाण्डुरम्॥ अमृत प्लुत हृष्टाङ्गं दिव्यभोगं रुद्र ॥१०॥

॥ दिग्देवतासमायुक्तं सुरासुर नमस्कृतम्॥ नित्यं शाश्वतमव्ययं व्यापिनं नन्दनं ध्रुवम् ॥११॥

॥ सत्यं शिवं चैकरूपं सुन्दरं परमेश्वरम्॥ वन्देऽहं सकलं कलङ्क रहितं रुद्रं प्रभुं शङ्करम् ॥१२॥

॥ द्विजो ध्यात्वैवमात्मानं सम्यग्गुरु स्वरूपिणम्॥ सम्प्रशस्य नरापः सन् ततो यजनमारभेत ॥१३॥

॥ इति ॥

॥ ततः शान्ति मन्त्र पाठः॥

ॐ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह॥ बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ॥१॥ ॐ द्विपदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदाः॥ विच्छन्दा याश्च सच्छन्दाः सूचीभिः शम्यन्तु त्वा ॥२॥ ॐ महानाम्न्यो रेवत्यो विश्वा आशाः प्रभूवरीः॥ मैघीर्विद्युतो वाचः सूचीभिः शम्यन्तु त्वा ॥३॥

ॐ नार्य्यस्ते पत्न्यो लोम व्विचिन्वन्तु मनीषया ॥ देवानाम्पत्न्यो दिशः सूचीभिः
शम्यन्तु त्वा ॥ ४ ॥ ॐ रजता हरिणीः सीसा युजो युज्यन्ते कर्म्मभिः ॥ अश्वस्य -
व्वाजिनस्त्वचि सिमाः शम्यन्तु शम्यन्तीः ॥ ५ ॥ ॐ सह स्तोमाः सह च्छ-
न्दस ऽ आवृतः सह प्प्रमा ऽ ऋषयः सप्त दैव्याः ॥ पूर्व्वेषाम्पन्थामनुदृश्य
धीरा ऽ अन्वालेभिरे रथ्यो न रश्मीन् ॥ ६ ॥ ॐ पयः पृथिव्याम्पय ऽ ओ -
षधीषु पयो दिव्यन्तरिक्षे पयोधाः ॥ पयस्वतीः प्प्रदिशः सन्तु मह्यम् ॥ ७ ॥
ॐ स्वस्तिन ऽ इन्द्रो व्वृद्धश्रवाः स्वस्तिनः पूषा व्विश्ववेदाः ॥ स्वस्तिन -
स्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्द्दधातु ॥ ८ ॥ ॐ व्विष्णोरराट

मसि । व्विष्णोः रन्प्त्रे स्थो । व्विष्णोः स्यूरसि । व्विष्णो ध्रुवोऽसि ॥ व्वैष्णवमसि व्विष्णवे त्वा ॥ ९ ॥ ॐ अग्निर्देवता व्वातो देवता सूर्यो देवता चन्द्रमा देवता व्वसवो देवता रुद्रा देवता दित्या देवता मरुतो देवता व्विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवता व्वरुणो देवता ॥ १० ॥ ॐ द्यौः शान्तिर न्तरिक्षᳬ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ व्वनस्पतयः शान्तिर्व्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व्वᳬ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ ११ ॥ ॐ गणानान्त्वा गणपतिᳬ हवामहे प्रियाणान्त्वा प्रियपतिᳬ हवामहे निधीनान्त्वा निधिपतिᳬ हवामहे व्वसो मम ॥ आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥ १२ ॥ ॐ अम्बेऽ अम्बिकेऽम्बालिके न मा नयति कश्चन ॥ स सस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥ १३ ॥ ॐ श्रीश्चते लक्ष्मीश्च

स सस्त्यश्वकः

पत्न्या वद्धोरात्रे पार्श्वे नक्षत्राणि रूपमाश्विनौ व्यात्तम्। इष्णन्निषाणामुम्म (६४)
इषाण सर्व्वलोकम्मऽइषाण॥१४॥ ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभ
रामहे मतीः। यथा शमसद्द्विपदे चतुष्पदे विश्वम्पुष्टं ग्रामेऽअस्मिन्न
नातुरम्॥१५॥ ॐ यतो यतः समीहसे ततो नोऽअभयं कुरु। शन्नः कुरु प्रजाभ्यो
भयन्नः पशुभ्यः॥१६॥ ॐ विश्वानि देवसवितर्दुरितानि परासुव।
यद्भद्रन्तन्नऽआसुव॥१७॥ इति॥ ततः — एतावन्तस्त्रगदोग्रक्षां विधाय, शान्ति
मन्त्रान् पठेत्। दिग्देवान्नमस्कृत्य च द्विजः सम्यग्यजनमारभेत्। यज्जाग्रत इति षड्
र्चा शिवसङ्कल्प ऋषिस्त्रिष्टुप् छन्दो मनो देवता रुद्र हृदय जपे विनियोगः॥

॥ अथप्रथमाध्यायः ॥

गणानान्त्वा०॥ गायत्री०॥ द्रुपदा०॥ सहस्त्रोमा०॥ ॐ यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य
तथैवैति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु ॥१॥
येन कर्म्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः। यदपूर्व्वं यक्षमन्तः प्र
जानान्तन्मे मनः शिवसङ्कल्पमस्तु ॥२॥ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्यो
तिरन्तरमृतम्प्रजासु। यस्मान्न ऽऋते किञ्चन कर्म्म क्रियते तन्मे मनः शि
व सङ्कल्पमस्तु ॥३॥ येनेदं भूतम्भुवनम्भविष्यत्परिगृहीतममृतेन सर्व्वम्।
येन यज्ञस्तायते सप्त होता तन्मे मनः शिवसङ्कल्पमस्तु ॥४॥ यस्मिन्नृ
चः साम यजूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः। यस्मिंश्चित्तं सर्व्व
मोतम्प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ॥५॥ सुषारथिरश्वानिव यन्मनु
ष्यान्नेनीयते ऽभीशुभिर्व्वाजिनऽइव। हृत्प्रतिष्ठं यदजिरञ्जविष्ठन्तन्मे मनः
शिव सङ्कल्पमस्तु ॥६॥

इति जपित्वा- "ॐ भूर्भुवः स्वः रुद्र हृदयाय नमः" इति हृदयं स्पृशेत्। ॐ

सहस्र शीर्षेत्यादि-षोड़शर्चस्य पुरुषसूक्तस्य नारायण ऋषिराद्यानाम्पञ्चदशानामनुष्टुप्-
छन्दो यज्ञेन यज्ञमित्यस्य त्रिष्टुप् छन्दः जगद्बीजं रुद्राशेरे जपे विनियोगः।

॥ अथ द्वितीयोऽध्याय॥

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात। स भूमिं सर्व्वत स्पृत्वा त्यतिष्ठ-
द्दशाङ्गुलम॥१॥ पुरुष एवेदं सर्व्वं यद्भूतं यच्च भाव्यम। उतामृतत्त्वस्ये-
शानो यदन्नेनातिरोहति॥२॥ एतावानस्य महिमातो ज्यायाँश्च पुरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि॥३॥ त्रिपादूर्ध्व उदैत्पुरुषः
पादोस्येहाभवत्पुनः। ततो विष्वङ् व्यक्रामत्साशनानशने अभि॥४॥
ततो विराडजायत विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्

भूमिमथो पुरः ॥५॥ तस्म्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्ज्यम्। पशूँस्ताँ
श्चक्रे व्वायव्व्यानारण्याग्ग्राम्याश्च ये ॥६॥ तस्म्माद्यज्ञात्सर्व्वहुत ऽऋचः
सामानि यज्ञिरे। छन्दांसि यज्ञिरे तस्म्माद्यजुस्तस्म्मादजायत ॥७॥ तस्म्मादश्वा
ऽअजायन्त ये के चोभयादतः। गावो ह यज्ञिरे तस्म्मात्तस्म्माज्जाता ऽअजावयः ॥८॥
तं यज्ञम्बर्हिषि प्प्रौक्षन्पुरुषञ्जातमग्ग्रतः। तेन देवा ऽअयजन्त साद्ध्या ऽ-
ऋषयश्च ये ॥८॥ यत्पुरुषं व्व्यदधुः कतिधा व्व्यकल्पयन्। मुखङ्किमस्या
सीत्किम्बाहू किमूरू पादा ऽउच्च्येते ॥१०॥ ब्राह्मणोस्य मुखमासीद्बाहू राजन्न्यः
कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो ऽअजायत ॥११॥ चन्द्रमा मनसो
जातश्चक्षोः सूर्यो ऽअजायत ॥१२॥ नाभ्या ऽआसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।

पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ऽअकल्पयन् ॥१३॥ यत्पुरुषेण हविषा (६८)
देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यङ्ग्रीष्म इध्मः शरद्धविः ॥१४॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञन्तन्वाना ऽ
अबध्नन्पुरुषम्पशुम् ॥१५॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि
प्रथमान्यासन्। ते ह नाकम्महिमानः सचन्त यत्र पूर्व्वे साध्याः स
न्ति देवाः ॥१६॥ इति जप्त्वा "ॐ भूर्भुवः स्वः रुद्र शिरसे स्वाहा" इति शिरः स्पृशेत॥
अद्भ्यः सम्भृत इत्यादि- षड्चस्योत्तर नारायणस्य नारायणपुरुष ऋषिराद्यानान्तिसृणा-
न्त्रिष्टुप छन्दो चतुर्थपञ्चमयोरनुष्टुप छन्दोऽन्त्यायास्त्रिष्टुप छन्दः आदित्यो-
देवता रुद्र शिखा जपे विनियोगः॥

ॐ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्म्मणः समवर्त्तताग्रे। तस्य त्वष्टा
विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥१७॥ वेदाहमेतम्पुरुषम्म-
हान्तमादित्यवर्ण्णन्तमसः परस्तात्। तमेव विदित्वाति मृत्युमेति नान्यः
पन्था विद्यतेऽयनाय ॥१८॥ प्रजापतिश्चरति गर्भेऽअन्तरजायमानो बहुधा
विजायते। तस्य योनिम्परि पश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि
विश्वा ॥१९॥ यो देवेभ्यऽआतपति यो देवानाम्पुरोहितः। पूर्वो यो दे-
वेभ्यो जातो नमो रुचाय ब्राह्मये ॥२०॥ रुचम्ब्राह्मञ्जनयन्तो देवाऽअग्रे
तदब्रुवन्। यस्त्वैवम्ब्राह्मणो विद्यात्तस्य देवाऽअसन्वशे ॥२१॥

श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाण अमुं म इषाण सर्वलोकं म इषाण ॥ २२॥ ❀

(इति जप्त्वा "ॐ भूर्भुवः स्वः रुद्र। शिखायै वषट्" इति। शिखां स्पृशेत्)

॥ ॥ ॥ ततः आशुः शिशान इत्यादि सप्तदशर्चस्याप्रतिरथ ऋषिराद्यानां द्वादशानां त्रिष्टुप् छन्द इन्द्रो देवता अवसृष्टेति द्वयोरनुष्टुप् छन्द इषु-गुरा दे देवते "अमीषामिति" त्रिष्टुप् छन्दो मरुद्देवता यत्र वाणा इति पङ्क्तिश्छन्दो वाणा देवता "मर्माणित" इति त्रिष्टुप् छन्दो वर्म देवता रुद्रकवचं जपे विनियोगः॥

॥ अथ तृतीयाध्यायः॥ :-

ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्। सङ्क्र-
न्दनो ऽनिमिषऽ एकवीरः शतꣳ सेनाऽ अजयत्साकमिन्द्रः ॥१॥ सङ्क्रन्द-
नेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिन्द्रेण जयत
तत्सहध्वं युधो नरऽ इषुहस्तेन वृष्णा ॥२॥ सऽइषुहस्तैः स निष-
ङ्गिभिर्वशी सꣳस्रष्टा स युधऽ इन्द्रो गणेन। सꣳसृष्टजित्सोमपा बाहु-
शर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३॥ बृहस्पते परिदीया रथेन रक्षोहा-
मित्राँ२ऽ अपबाधमानः। प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमे-
ध्यविता रथानाम् ॥४॥ बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी स-
हमानऽ उग्रः। अभिवीरोऽ अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥५॥

गोत्रभिदङ्गोविदं वज्रबाहुञ्जयन्तमज्मप्रमृणन्तमोजसा। इमꣳ सजाताऽ
अनुवीरयध्वमिन्द्रꣳ सखायोऽ अनु सꣳरभध्वम्॥६॥ अभिगोत्राणि सहसा
गाहमानोऽदयो वीरः शतमन्युरिन्द्रः। दुश्च्यवनः पृतनाषाडयुध्योऽ
स्माकꣳ सेनाऽ अवतु प्रयुत्सु॥७॥ इन्द्रऽ आसान्नेता बृहस्पतिर्दक्षिणा यज्ञः
पुरऽएतु सोमः। देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्रम्॥८॥
इन्द्रस्य वृष्णो वरुणस्य राज्ञऽ आदित्यानाम्मरुताꣳ शर्धऽ उग्रम्॥
महामनसाम्भुवनच्यवानाङ्घोषो देवानाञ्जयतामुदस्थात्॥९॥
उद्धर्षय मघवन्नायुधान्युत्सत्वनाम्मामकानाम्मनाꣳसि। उद्वृत्रहन्वा-

जिनां वाजिनाम्न्युद्धानां जयतां जन्तु घोषाः ॥१०॥ अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्मा (९२)
कं या ऽ इषवस्ता जयन्तु। अस्माकं वीरा ऽ उत्तरे भवन्त्वस्माँ २ ऽ उ देवा ऽ अवता ह
वेषु ॥११॥ अमीषाञ्चित्तम्प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ॥ अभि प्रेहि निर्द्दह
हृत्सु शोकै रन्धेनामित्रास्तमसा सचन्ताम् ॥१२॥ अवसृष्टा परापत शरव्ये ब्रह्म
सꣳशिते ॥ गच्छामित्रान्प्रपद्य स्व मामीषां कञ्चनोच्छिषः ॥१३॥ प्रेता जयता नर ऽ
इन्द्रो वः शर्म्म यच्छतु ॥ उग्रा वः सन्तु बाहवो नाधृष्या यथा संथ ॥१४॥ असौ या सेना
मरुतः परेषामभ्येति न ऽ ओजसा स्पर्द्धमाना ॥ तां गूहत तमसापव्रतेन यथामी
ऽ अन्यो ऽ अन्यन्न जानन् ॥१५॥ यत्र बाणाः सम्पतन्ति कुमारा विशिखा ऽ इव ॥
तन्न इन्द्रो बृहस्पतिरदितिः शर्म्म यच्छतु विश्वाहा शर्म्म यच्छतु ॥१६॥

मर्म्माणिते वर्म्मणा च्छादयामि सोमस्त्वा राजामृतेनानुवस्ताम्॥ उरोर्वरीयो वरु
णस्ते कृणोतु जयन्तन्त्वानु देवा मदन्तु॥१७॥ इति जप्त्वा "ॐ भूर्भुवः स्वः रुद्रकवचाय हुम्"
इति बाहू ह्रदयं स्पृशेत्॥ विभ्राडित्यादि - चतुर्दशर्चस्य। चित्रमिति कीलकसहितस्य सूर्यो देवता आद्याया विभ्राट् सूर्य
ऋषिर्जगती च्छन्दः, उदुत्यमिति तिसृणां प्रस्कण्व ऋषिर्गायत्री च्छन्दस्तम्प्रत्नथेति कीलकस्य वत्सार कश्यप
ऋषिर्जगती च्छन्दो विश्वे देवा देवता अयम्वेन इति कीलकस्य वेन ऋषिस्त्रिष्टुप्छन्दः सोमो देवता। चित्रन्दे
वानामिति कीलकस्य कुत्स आङ्गिरस ऋषिस्त्रिष्टुप्छन्द आन इत्यगस्त्य ऋषि। त्रिष्टुप्छन्दो यदद्येति श्रुत
कक्षसुतकक्षावृषी गायत्री च्छन्दस्तरणिरिति प्रस्कण्व ऋषिर्गायत्री च्छन्दस्तत्सूर्यस्येति द्वयोः कुत्स ऋ
षि। त्रिष्टुप्छन्दो बण्महानिति द्वयोर्जमदाग्नि ऋषिर्बृहती सतो बृहत्यौ च्छन्दसी श्रायन्त इवेति नृमेध
ऋषिर्बृहती च्छन्दो अद्यादेवा इति कुत्स ऋषिस्त्रिष्टुप्छन्द आकृष्णेनेति हिरण्यस्तूप आङ्गिरस ऋषि
स्त्रिष्टुप्छन्दो रुद्रनेत्र जपे। विनियोगः॥

अथ चतुर्थोऽध्यायः—

हरिः ॐ विभ्राड् बृहत्पिबतु सोम्यम्मध्वायुर्द्दधद्यज्ञपतावविहुतम् ॥ वातजूतो योऽ
अभिरक्षति त्मना प्रजाः पुपोष पुरुधा विराजति ॥१॥ उदु त्यञ्जातवेदसन्देवं वह-
न्ति केतवः ॥ दृशे विश्वाय सूर्यम् ॥२॥ येना पावक चक्षसा भुरण्यन्तञ्जनाँ२ऽ अनु ॥
त्वं वरुण पश्यसि ॥३॥ दैव्यावध्वर्यूऽ आगतꣳ रथेन सूर्यत्वचा ॥ मध्वा यज्ञꣳ सम-
ञ्जाथे ॥ तम्प्रत्नथायं वेनश्चित्रन्देवानाम् ॥४॥ तम्प्रत्नथा पूर्वथा विश्वथेमथा
ज्येष्ठतातिं बर्हिषदꣳ स्वर्विदम् ॥ प्रतीचीनं वृजनन्दोहसे धुनिमाशुञ्जयन्तमनुया
सु वर्द्धसे ॥५॥ अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ॥
इममपाꣳ सङ्गमे सूर्यस्य शिशुन्न विप्रा मतिभी रिहन्ति ॥६॥ चित्रन्देवानामुदगा-
दनीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ आप्रा द्यावापृथिवीऽ अन्तरिक्षꣳ सूर्यऽ
आत्मा जगतस्तस्थुषश्च ॥७॥ आ नऽ इडाभिर्विदथे सुशस्ति विश्वानरः
सविता देवऽ एतु ॥ अपि यथा युवानो मत्सथा नो विश्वञ्जगदभिपित्वे मनीषा ॥८॥

यदद्य कच्चं वृत्रहन्नुदगा ऽ अभि सूर्य्य। सर्व्वन्तदिन्द्र ते वशे ॥९॥ तरणि-
र्व्विश्वदर्शतो ज्योतिष्कृदसि सूर्य्य। विश्वमाभासि रोचनम् ॥१०॥ तत्सूर्य्यस्य-
देवत्वन्तन्महित्वं मध्या कर्त्तोर्व्विततं सञ्जभार। यदेदयुक्त हरितः सध-
स्थादाद्रात्री वासस्तनुते सिमस्मै ॥११॥ तन्मित्रस्य वरुणस्याभिचक्षे सू-
र्य्यो रूपं कृणुते द्योरुपस्थे। अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः
सम्भरन्ति ॥१२॥ बण्महाँ २ ऽ असि सूर्य्य बडादित्य महाँ ऽ असि। महस्ते सतो महिमा
पनस्यते ऽद्धा देव महाँ २ ऽ असि ॥१३॥ बट् सूर्य्य श्रवसा महाँ २ ऽ असि सत्रा
देव महाँ २ ऽ असि। मह्ना देवानामसुर्य्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥१४॥
आयन्त ऽ इव सूर्य्यं विश्वेदिन्द्रस्य भक्षत। वसूनि जाते जनमान ऽ ओजसा

ष्प्राते भागन्न दीधिम ॥१५॥ अद्या देवा ऽ उदिता सूर्य्यस्य निरᳬहसः पिपृता नि-
रवद्यात् । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी ऽ उत द्यौः ॥१६॥
आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेन
सविता रथेना देवो याति भुवनानि पश्यन् ॥१७॥ इति जपित्वा – "ॐ भूर्भुवः स्वः
रुद्र तेज अपाय वौषट्" इति नेत्रं स्पृशेत् ॥ ——— नमस्त इत्यादि षोडशर्चस्याध्याया-
नां चतुर्दशानां परमेष्ठी ऋषिर्नमस्त इति गायत्री छन्दो यात इति तिसृणामनुष्टुप्छन्दो ऽध्यवोच-
दिति तिसृणां पङ्क्तिश्छन्दो नमोऽस्त्वित्यादि सप्तानामनुष्टुप्छन्दो मान इति द्वयोः कुत्स ऋषिर्जगती
छन्द एकरुद्रो देवता रुद्राध्याय जपे विनियोगः ॥

अथ पञ्चमाध्यायः –

हरिः ॐ नमस्ते रुद्र मन्यव ऽ उतोत ऽ इषवे नमः । बाहुभ्यामुत ते नमः ॥१॥
याते रुद्र शिवा तनूरघोरा पापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ता-
भि चाकशीहि ॥२॥ यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र

ताꣳ इ॰ कुरु मा हिꣳसीः पुरुषञ्जगत ॥ ३॥ शिवेन वचसा त्वा गिरिशाच्छा वु-
दामसि। षथा नः सर्व्व मिज्जगदयक्ष्मꣳ सुमना ऽअसत ॥ ४॥ अद्ध्यवोचदधिव-
क्ता प्रथमो दैव्यो भिषक् ॥ अहीँश्च सर्व्वाञ्जम्भयन्त्सर्व्वाश्च षातुधान्यो ऽ
धराचीः परासुव ॥ ५॥ असौ षस्ताम्रो ऽअरुण ऽउत बभ्रुः सुमङ्गलः ॥ षे चै-
नꣳ रुद्रा ऽअभितो दिक्षु श्रिताः सहस्रशो वैषाꣳ हेड ऽईमहे ॥ ६॥
असौ षो ऽवसर्प्पति नीलग्ग्रीवो विलोहितः ॥ उतैनं गोपा ऽअदृश्रन्नदृश्र-
न्नुदहार्य्यः स दृष्टो मृडयाति नः ॥ ७॥ नमो ऽस्तु नीलग्ग्रीवाय सहस्राक्षाय मीढु-
षे ॥ अथो षे ऽअस्य सत्त्वानो हन्तेभ्यो करन्नमः ॥ ८॥ प्रमुञ्च धन्वनस्त्वमु-
भयो रार्त्न्यो र्ज्याम् ॥ षाश्च ते हस्त ऽइषवः ऽआ भुवस्य निषङ्गधिः ॥ १०॥
षा ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मया

परि भुज ॥११॥ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ॥ अथो य ऽ
इषुधिस्तवारे ऽ अस्मन्निधेहि तम् ॥१२॥ अवतत्य धनुष्ट्वꣳ सहस्राक्ष शते
षुधे ॥ निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥१३॥ नमस्त ऽ आयु-
धायानातताय धृष्णवे ॥ उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥१४॥
मानो महान्तमुत मानो ऽ अर्भकम्मा न ऽ उक्षन्तमुत मा न ऽ उक्षितम् ॥ मानो-
वधीः पितरम्मोत मातरम्मा नः प्रियास्तन्वो रुद्र रीरिषः ॥१५॥
मानस्तोके तनये मा न ऽ आयुषि मा नो गोषु मा नो ऽ अश्वेषु रीरिषः ॥
मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥१६॥
इति जपित्वा- "ॐ भूर्भुवः स्वः रुद्रास्त्राय फट्" इति ताल त्रयादिना दिग्बन्धनं कुर्यात् ॥
इति षडङ्गानि जप्त्वा, ततः इति हृदिपद्याघोर ऋषिः रुद्रो देवता नमस्त इति गायत्री छन्दो
यात इति तिसृणामनुष्टुप् छन्दो अध्यप वोचादीति तिसृणां पङ्क्तिश्छन्दो नमोऽस्त्वित्यादि-

सतानामनुष्टुप्छन्दो मान इति द्वयोः कुत्स ऋषिर्जगती छन्दो नमो हिरण्यबाहव इत्या
दीनि यजूंषि बहुरुद्र नैवत्यन्यन्धस इत्युपरिष्टाद् बृहती छन्दः इमा रुद्रायेति कुत्स ऋषि
र्जगती छन्दो यात इत्यनुष्टुप छन्दः परि नो मीढुष्टम इति त्रिष्टुप्छन्दो विकिरिद्र विलोहित सह
स्राणि सहस्रश इत्यनुष्टुप्छन्दो असङ्ख्याता इत्यादि दशानामनुष्टुप्छन्दो बहुरुद्रो देवता न
मोऽस्त्वित्यादि त्रीणि यजूंषि बहुरुद्रदेवत्यानि वय ह सोमेति गायत्री छन्दः सोमो दे
वता एष त इति यजुरव रुद्रामीति पङ्क्तिश्छन्दो भेषजामीति ककुप्छन्दस्त्र्यम्बकमिति
द्वे अनुष्टुभावेतत्त इत्यास्तार पङ्क्तिश्छन्दो रुद्रो देवता त्र्यायुषमित्युष्णिक् छन्दः आशी
र्देवता शिवो नामेति क्षुरो देवता न तम्बिदेति द्वे त्रिष्टुभाते विश्वकर्म देवता सर्वपापक्षयपूर्व
क श्रीरुद्रप्रीत्यर्थे शतरुद्रीयजपे (पाठे) विनियोगः॥

पञ्चमाध्यायः —

१ॐ नमस्ते रुद्र मन्यव ऽउतोत ऽइषवे नमः। बाहुभ्यामुत ते नमः ॥१॥ याते रुद
द्र शिवा तनूरघोरा पापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशी
हि ॥२॥ यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे। शिवाङ्गिरित्र ताङ्कुरु माहिंसीः
पुरुषञ्जगत ॥३॥ शिवेन वचसा त्वा गिरिशाच्छा वदामसि। यथा नः सर्व्वमिज्ज
गदयक्ष्मꣳ सुमना ऽअसत् ॥४॥ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।
अहींश्च सर्व्वाञ्जम्भयन्त्सर्व्वाश्च यातुधान्यो ऽधराचीः परासुव ॥५॥ असौ
यस्ताम्रो ऽअरुण ऽउत बभ्रुः सुमङ्गलः। ये चैनꣳ रुद्रा ऽअभितो दिक्षु श्रि
ताः सहस्रशोवैषाꣳ हेड ऽईमहे ॥६॥ असौ यो ऽवसर्पति नीलग्रीवो वि
लोहितः। उतैनङ्गोपा ऽअदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टो मृडयाति नः ॥७॥

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो ये ऽअस्य सत्त्वानो ऽहन्तेभ्योऽकर
न्नमः॥८॥ प्रमुञ्च धन्न्वनस्त्वमुभयोरार्त्न्योर्ज्ज्याम्। याश्चते हस्त ऽइषं
वः परा ता भगवो व्वप॥९॥ व्विज्ज्यन्धनुः कपर्द्दिनो व्विशल्ल्यो बाणवाँ२ ऽउत। अनेै
शन्नस्य या ऽइषवऽ आभुरस्य निषङ्गधिः॥१०॥ याते हेतिर्म्मीढुष्टम हस्ते बभूव ते ध-
नुः॥ तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज॥११॥ परि ते धन्न्वनो हेतिरस्म्मान्वृ
णक्तु व्विश्वतः॥ अथो य ऽइषुधिस्तवारे ऽअस्मन्निधेहि तम्॥१२॥ अवतत्त्य धनु-
ष्ट्वꣳ सहस्राक्ष शतेषुधे। निशीर्य्य शल्ल्यानाम्मुखा शिवो नः सुमना भव॥१३॥
नमस्त ऽ आयुधायानातताय धृष्णवे। उभाभ्यामुत ते नमो बाहुब्भ्यान्तव धन्वने॥१४॥
मानो महान्तमुत मानो ऽ अर्ब्भकम्मान ऽ उक्षन्तमुत मा न ऽ उक्षितम्॥ मानो बधीः पितरम्मो
त मातरम्मा नः प्प्रियास्तन्न्वो रुद्द्र रीरिषः॥१५॥ मानस्तोके तनये मा न ऽ आयुषि मानो गो

षु मानो ऽअश्वेषु रीरिषः ॥ मानो व्वीरा न्रुद्र भामिनो व्वधीर्हविष्मन्तः सदमित्त्वा-
हवामहे ॥१६॥ नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो नमो व्वृक्षेभ्यो हरि-
केशेभ्यः पशूनाम्पतये नमो नमः शष्पिञ्जराय त्त्विषीमते पथीनाम्पतये नमो नमो-
हरिकेशायोपवीतिने पुष्टानाम्पतये नमो नमो बब्भ्लुशाय ॥१७॥ नमो बब्भ्लुशाय व्या-
धिनेऽन्नानाम्पतये नमो नमो भवस्य हेत्यै जगताम्पतये नमो नमो रुद्रायाततायिने-
क्षेत्राणाम्पतये नमो नमः सूतायाहन्त्यै व्वनानाम्पतये नमो नमो रोहिताय ॥१८॥ नमो रोहिता-
य स्थपतये व्वृक्षाणाम्पतये नमो नमो भुवन्तये व्वारिवस्कृतायौषधीनाम्पतये नमो नमो मन्त्रि-
णे व्वाणिजाय कक्षाणाम्पतये नमो नमऽउच्चैर्घोषायाक्रन्दयते पत्तीनाम्पतये नमो नमः
कृत्स्नायतया ॥१९॥ नमः कृत्स्नायतया धावते सत्त्वनाम्पतये नमो नमः सहमानाय-
निव्याधिन आव्याधिनीनाम्पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानाम्पतये न-
मो नमो निचेरवे परिचरायारण्यानाम्पतये नमो नमो व्वञ्चते ॥२०॥ नमो व्वञ्चते-
परिवञ्चते स्तायूनाम्पतये नमो नमो निषङ्गिणऽइषुधिमते तस्कराणाम्पतये नमो नमः

शेषः ४२ पृष्ठे

२०१ मिति वैशाख सुदि ८ आषाढ मा (हीरा) कनाथ आचार्य श्री प्रभुपादि देव पत्तने वास्तव्य इति
वास्य ७१ गते बृहस्पती निमित्त मोती

॥ श्रीगणेशाय नमः ॥ श्रीगुरुचरण कमलेभ्यो नमः ॥

श्रीविद्यां श्रीगुरुन्नत्वा श्रीचक्रे त्रिपुरेश्वरीम् ॥ तत्साधकहितां कुर्वे तदाराधन
पद्धतिम् ॥ श्रीविद्यामन्त्रसाधकोत्तमो ब्राह्मे मुहूर्ते चोत्थाय गृहाद्बहिर्निर्गत्य कृत
दन्तधावनः शौचाचमनादिकः शुद्धे शुक्ले वाससी परिधाय शुद्धस्थले यथोचितासने
प्राङ्मुखोदङ्मुखो वा विभूत्या विभूति स्नानं कृत्वा मूलविद्यामुच्चारयन् षट्प्रा-
णायामादिकान् कुर्यात् प्रतितत्र प्राक् ध्यानम् ॥ बालार्कमण्डलाभासां चतुर्बाहां त्रिलो-
चनाम् ॥ पाशाङ्कुशशरांश्चापन्धारयन्तीं शिवाम्भजे ॥ अथ मन्त्रोद्धारः ॥ बिन्दुत्रिकोण-
वसुकोणदशारयुग्मं मन्वस्र नागदलसङ्गत षोडशारम् ॥ वृत्तत्रयञ्च धरणीसदनत्रयञ्च
श्रीचक्रराजमुदितं परदेवतायाः ॥ अथ मन्त्रोद्धारः ॥ आदौ लज्जां समुच्चार्य क ए ई ला-

तः परम् ॥ पुनश्च लज्जामुच्चार्य हसकहल तु तत्परम् ॥ ततो लज्जां पुनः प्रोच्य लज्जान्तं
सकलं ततः ॥ षोडशाक्षरं मन्त्रोऽयं षोडश्याः समुद्धृतः ॥२॥ इयन्तु सुन्दरी विद्या-
देवानामपि दुर्लभा ॥ गोपनीया प्रयत्नेन सर्वसम्पत्करी मता ॥३॥ अथ मन्त्रः ॥
॥ ह्रीं कएईल ह्रीं हसकहल ह्रीं सकल ह्रीं स्वाहा ॥ अथ पूजाविधिः ॥ तत्रोत्तमो-
साधको ब्राह्मे मुहूर्ते उत्थाय शय्यायामेवास्थित्वा । शिरसि महासहस्रदलकमले श्रीगुरुं ध्या-
येत् ॥ द्विनेत्रं द्विभुजं शान्तं गुरुं पद्मासनास्थितम् ॥ यथावर्णं सुखासीनं मुक्ताभास्वररू-
पिणम् ॥ वामेनोत्पलधारिण्या शक्त्या वामोरुसंयुतमिति ध्यात्वा । अखण्डमण्डलाकारं-
व्याप्तं येन चराचरम् ॥ तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥१॥ अज्ञानतिमिरान्धस्य ज्ञा-
नाञ्जनशलाकया ॥ चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥२॥ नमोऽस्तु गुरवे तस्मै इष्ट-
देवस्वरूपिणे ॥ यस्य वागमृतं हन्ति विषसंसारसङ्कुलम् ॥३॥ अनन्तरात्मा गुरुं नमस्कृत्य
अन्तर्भावनां कुर्यात् ॥ मूलमष्टोत्तरशतं जपेत् ॥ ततो भूमिं स्पृशेत् ॥ ~~विष्णु~~ तत्र क्रमः ॥
॥ समुद्रमेखले देवि पर्वतस्तनमण्डले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥
इति पठन् वामपादपुरस्सरं भूमिं स्पृशेत् ॥ तत्र मन्त्रः ॥ हसह्रीं ऐं कए क्लीं स इति स्पृष्ट्वा ।
तत्रासनमास्तीर्योपविश्य मूलादिब्रह्मरन्ध्रान्तं मूलविद्यां विचिन्त्य जपेत् ॥

उद्यतादित्य सङ्काशान्तडित्कोटिसमप्रभाम्॥ तत्प्रभापटलव्याप्तन्देहं सुपरि चिन्तयेत्॥
षट्चक्रभेदनङ्कुर्यात्॥ तद्यथा॥ गुदालिङ्गान्तरे वं शं षं सं इति चतुर्दलम्पीतवर्णम्मूला
धारम्॥ अत्र देवता डाकिनी गणेशश्चतुर्दलान्ताह्त्रिकोण विद्युद्वर्णन्तन्मध्ये बिसत-
न्तुतनीसी शब्दावर्तानिभाँ सार्द्धत्रिबलान्विता म्प्रसुप्त भुजगाकारां सोमसूर्याग्निरूपि
णीं कुण्डलिनीं शक्तिं हुं कारेण मनोमयदण्डेनाहत्योत्थाप्य हंसः इति जप्त्वा॥१॥
लिङ्गमूले वं भं मं यं रं लमिति रक्तं स्वाधिष्ठानम्। तत्र डाकिनी देवी ब्रह्मा च॥२॥ नाभौ डं ढं
णं तं थं दं धं नं पं फमिति नीलं मणिपूरम्। तत्र लाकिनी देवी विष्णुश्च॥३॥ हृदये कं खं गं घं
ङं चं छं जं झं ञं टं ठमिति द्वादशदलन्धूम्रमनाहतचक्रम्। तत्र काकिनी देवी रुद्रश्च॥४॥
कण्ठे अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः इति षोडशदलं पिङ्गलवर्णं विशुद्ध
चक्रम्। तत्र शाकिनी देवी शिवात्मा॥५॥ भ्रूमध्ये हं क्षमिति द्विदलमाज्ञाचक्रम्। तत्र हाकि
नी देवी परमात्मा च॥६॥ एवं षट्चक्राणि भित्त्वा सहस्रदलकमलकर्णिकान्तर्गतबिन्दुरू
पे परमशिवे संयोज्य लाक्षाभपरमामृतेन कुण्डलिनीं सन्तर्प्य पुनरेतान्विशुद्धानाहतान्विपु
स्वाधिष्ठानमूलाधारन्नयेत्॥ इति भावना देवीन्ध्यात्वा मानसोपचारैस्समपूज्य जप्त्वा स्तु-

धावन

त्वा नत्वा आवश्यक शौचादिक कृत्वा दन्त [illegible] गृहीत्वा ॥ क्लीं सर्व्वजनप्रियायै रतिकाम-
स्वरूपायै नमः ॥ इति मन्त्रेण दन्त धावनं कुर्यात ॥ ततो मूलेन मुख प्रक्षालनं कृत्वा यथाका-
ले जलाशयं गत्वा सूर्य्यो । मे मुरवम्भु ॥ दातवदेकवारान्निमज्ज्य पुरतः श्चतुर्हस्त प्रमाणञ्च-
तुरस्रं प्रकल्प्य तन्मध्ये त्रिकोणं विलिख्य सूर्य्य मण्डलाद् कुंश मुद्रया तीर्थमानयेत ॥
ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥ नर्म्मदे । सिन्धु कावेरि जलेऽस्मिन् सान्निधिं कुरु ॥ वामिति-
धेनु मुद्राम्प्रदर्श्य मूल मष्टधा जपित्वा ॥ कलश मुद्रया मूलेन सप्तधा । शिरसि सिञ्चयेत ॥ सप्त-
च्छिद्राणि । निरुध्य । त्रिधा । निमज्जयेत ॥ पात्र प्रोक्षणं कृत्वा सन्ध्यां कुर्यात ॥ प्राणायाम त्रयं कृत्वा
वामिति धेनु मुद्रया जल ममृती कृत्य त्रिभिः । शिरो मूलेना भ्युक्ष्य नवधाऽऽचम्य तज्जलं न्दक्षिण
करे कृत्वा लं वं रं यं हमिति पाञ्च भौतिक मन्त्र मष्टधा जपित्वा मूलन्द शधा जपेत ॥ वाम-
हस्ता नामिकाङ्गुष्ठाभ्याङ्कोटिका योगेन त्रिः । शिरो भ्युक्ष्यावशिष्ट जलं वाम हस्ते ईडया अन्तर्गत-
मत्वा तेनैव निश्शेष कलुषन्दग्धं विचिन्त्य पिङ्गलया म्बहिर्गतं विभाव्य तज्जलन्दक्षिण-
करे कृत्वा तत्र पापपुरुषं विचिन्त्य वाम भागे भूमौ वज्र । शिलान्ध्यात्वा तत्र निःक्षिप्य पापपु-
रुषञ्चूर्णितं भावयेदित्यघ मर्षणम् ॥ ततो देवादीन् यथाविधि सन्तर्प्य ॥ ॐ गणेशं तर्पयामि ॥
सर्व्वान् पितृगणांस्तर्पयामि ॥ सर्व्वान् मातृगणांस्तर्पयामि ॥
वटुकन्तर्पयामि ॥ योगिनीन्तर्पयामि ॥ सर्व्वान् देवगणांस्तर्पयामि ॥ सर्व्वान् मनुष्य गणांस्तर्पयामि ॥

सर्व्वान् तर्प्पयामि मूलमुच्चार्य्य ॥ श्रीमहात्रिपुरसुन्दरीं तर्प्पयामि नमः ॥ इति त्रिवारान्तर्पयित्वा । ऐं आत्मतत्वं
शोधयामि ॥ क्लीं विद्यातत्वं शोधयामि ॥ सौः शिवतत्वं शोधयामि ॥ ऐं क्लीं सौः सर्वतत्वं शोधयामि ॥ ततो जलादुत्थाय
शुद्ध-शुक्ले धौत वाससी परिधाय मूलेन तिलक कुंकुमगन्धपुष्पाक्षतैरर्घ्यं सम्पाद्य ओं ऐं ह्रीं श्रीं कुलमार्तण्ड-
भैरवाय तिथि वार नक्षत्र योग करण प्रकाश शक्ति सहिताय एषोऽर्घो नमः ; इति मन्त्रेण सूर्यायार्घ्यं दत्त्वाथ
यथाशक्ति देवता गायत्रीं जपेत् ॥ तत्रादौ बालयाऽऽचम्य (॥ ॐ ऐं वाग्भवेश्वरि विद्महे क्लीं कामेश्वरि धीमहि सौः
तन्नः शक्तिः प्रचोदयात् ॥) क्लीं कामेश्वरि विद्महे वागीश्वरि धीमहि ॥ तन्नः क्लिन्ना प्रचोदयात् इति वा ।
रात्रौ तु ॥ क्षीरोदार्णव सम्भूत अत्रिगोत्र समुद्भव ॥ गृहाणार्घ्यं मिदं देव रोहिण्या सहित प्रभो इति चन्द्रा-
यार्घ्यं दद्यात् ॥ एवं संध्या काले प्रदोषेऽपि कुर्य्यात् ॥ ततो देवं मत्वा नमस्कृत्य पूजागृहद्वारमागत्य
हस्तौ पादौ च प्रक्षाल्याऽऽचम्य । अस्त्राय फट् नमः इति द्वारं संप्रोक्ष्य पूजयेत् ॥ वामे शाखायां गं
गणेशाय नमः ॥ दक्षिणे क्षं क्षेत्रपालाय नमः ॥ ऊर्ध्वे द्वारश्रियै नमः ॥ दें देहली मध्ये देहल्यै नमः ॥
वामपार्श्वे क्लीं कामदेवाय नमः ॥ रं रत्यै नमः ॥ वं वसन्ताय नमः ॥ प्रीं प्रीत्यै नमः ॥ ओं शंखनिधये नमः ॥
दक्षपार्श्वे - पद्मनिधये नमः ॥ सरस्वत्यै नमः ॥ श्रियै नमः ॥ मायायै नमः ॥ दुर्गायै नमः ॥ भद्रकाल्यै नमः ॥
स्वाहायै नमः ॥ शुभकर्य्यै नमः ॥ गौर्य्यै नमः ॥ लोकधात्र्यै नमः ॥ वागीश्वर्य्यै नमः ॥ दक्षपादपुरस्सरं
मङ्गलानि सङ्कोचयन् गृहान्तः प्रविशेत् ॥ तत्र गृहान्तः कल्पयेत् ॥ ऐशान्यां पूजयेत् ॥ ॐ वास्तुपुरुषाय

नमः ।। ॐ ब्रह्मणे नमः ।। ततः ।। अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।। ये भूता विघ्नकर्तारस्ते नश्यन्तु
शिवाज्ञया ।। इति तर्जन्यङ्गुष्ठाभ्यां दिक्षु विकिरेदिति भूतापसरणम् ।। अं ह्रौं ह्रौं तालत्रयं दत्वा त्रिविघ्नान्
वामपादत्रिघातैरुत्सारयेत् ।। ततो व्याघ्राजिनकुशकम्बलाद्यासनमास्तीर्यासने धृत्वा पठेत् ।। अ-
स्यासनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनोपवेशने विनियोगः ।। ॐ पृथ्वि
त्वया धृता लोका देवि त्वं विष्णुना धृता ।। त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ।। ततः पूजयेत् ।।
कूं कूर्मासनाय नमः ।। आधारशक्तिकमलासनाय नमः ।। ऐं ह्रीं श्रीं सर्वशक्तिकमलासनाय नमः ।। ॐ पृ
थिव्यै नमः ।। ततः स्वस्तिकासनेनोपविश्य ऐं ह्रीं श्रीं अमृतार्णवासनाय नमः, इति पादयोः ।। ऐं ह्रीं श्रीं
श्वेताम्बुजासनाय नमः, इति जान्वोः ।। ऐं ह्रीं श्रीं दिव्यासनाय नमः, इति पार्श्वयोः ।। ऐं ह्रीं श्रीं चक्रासनाय
नमः इति गुह्ये ।। आसनस्य चतुःकोणेषु पूजयेत् ।। ॐ गणपतये नमः ।। दुर्गायै नमः । वटुकभैरवाय नमः । क्षेत्र
पालाय नमः ।। इति वायव्यादि नैर्ऋत्यन्तम् ।। ततः ह्रीं कएईलह्रीं हसकहलह्रीं सकलह्रीं गण
पतये नमः ।। पृष्ठे क्षेत्रपालाय नमः ।। सम्मुखे श्रीमहात्रिपुरसुन्दर्यै नमः ।। अथ भूतशुद्धिः ।।
स्वाङ्के उत्तानौ हस्तौ कृत्वा सोऽहमिति मन्त्रेण मूलाधारे स्थितां सर्पाकारां कुण्डलिनीं हुंकारेण म-
नोमयदण्डेनाहत्योत्थाप्य स्वाधिष्ठान [illegible] प्रदीपकलिकाकारं जीवात्मानं नाभ्या
सह ब्रह्मरन्ध्रचक्रे स्थिते सहस्रदलकमलान्तर्गत बिन्दुरूपपरमशिवे संयोज्य शरीरं
शून्यं विचिन्त्य कुक्षौ पापपुरुषं ध्यायेत् ।। वामकुक्षौ स्थितं पापपुरुषं कज्जलप्रभम् ।। [illegible]

ब्रह्महत्या शिरस्कन्धं स्वर्णस्तेयभुजद्वयम् ॥ सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ॥१॥ (९)
तत्संयोगिपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ॥ उपपातकरोमाणं रक्तश्मश्रुविलोचनम् ॥२॥
अचेतनमधोवक्त्रं दग्धपादपसन्निभम् ॥ खड्गचर्म्मधरं क्रुद्धं पापपुरुषं विचिन्तयेत् ॥३॥
इति ध्यात्वा तेन सह शोषणादिकं कुर्यात् ॥ वामनासापुटेन यमिति वायुबीजं धूम्रवर्णं षो-
डशवारान् जपन् वायुमुत्थाप्य नाभौ दशदले नियोज्य समस्तशरीरं पापपुरुषेण संशोषयेत् ॥
नासापुटे धृत्वा रमिति बीजं रक्तवर्णं चतुःषष्टिवारान् जपन् कुम्भकयोगेन शरीरं तेन सह
भस्मीकुर्यात् ॥ वायुमुत्थाप्य हृदि द्वादशदले नियोज्य वमिति वरुणबीजं शुक्लवर्णं [illegible]
जपन् ॥ अमृतधारापातं ध्यात्वा ठमिति चन्द्रबीजं चतुःषष्टिवारान् जपन् अमृतवृष्ट्या कुम्भक-
योगेनाप्लावयेत् लमिति भूमिबीजं पीतवर्णं मूलाधारे स्तम्भमण्डले नियोज्य समस्तशरीरं पुनर्देवता-
रूपं नवयोग्यं शरीरं दृढीकुर्वन् हंस इति मन्त्रेण जीवात्मानं हृदयपद्मे नयेत् ॥ कुण्डलिनीं मूल-
चक्रं नयेत् ॥ इति भूतशुद्धिः ॥ ततो हृदि हस्तं दत्वा प्राणप्रतिष्ठां कुर्यात् ॥ अस्य प्राणप्रतिष्ठा
मन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छन्दांसि चैतन्यरूपिणी परमात्मा देवता
प्राणप्रतिष्ठायां विनियोगः ॥ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः मम प्राणा इह प्राणाः मम
जीव इह स्थितः ॥१४॥ मम सर्वेन्द्रियाणि ॥१४॥ मम वाङ्मनश्चक्षुःश्रोत्रघ्राणत्वग्रसनाप्राणा
इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ अथ प्राणायामः ॥ वामनासापुटं धृत्वा कर

मोमिति षोडशवारं जपन् वायुं शनैः शनैः पूरयेदिति पूरकः॥ नासापुटौ धृत्वा ह्सकलह्री-
मिति बीजं चतुःषष्टिवारं जपन् वायुं कुम्भयेत्॥ इति कुम्भकः॥ सकलह्रीमिति बीजं द्वात्रिं-
शद्वारं जपन् वायुं दक्षनासापुटे शनैः शनैः रेचयेत्॥ इति रेचकः॥ एवं प्राणायामत्रयं कुर्यात्॥
अथ मातृकान्यासः॥ अस्य श्रीमातृकान्यासमन्त्रस्य ब्रह्मऋषिर्गायत्री छन्दो वर्णात्मजननीमा-
तृका देवता हलो बीजानि स्वराः शक्तयः कर्मसाङ्गुण्ये विनियोगः॥ शिरसि- ब्रह्मर्षये नमः॥
मुखे- गायत्री छन्दसे नमः॥ हृदि- वर्णात्मजननी मातृकादेवतायै नमः॥ गुह्ये- हल्भ्यो बीजेभ्यो नमः॥
गुदे- स्वरेभ्यः शक्तिभ्यो नमः॥ पादयोः- कर्मसाङ्गुण्ये विनियोगः॥ मातृकां ध्यायेत्॥ पञ्चाश-
ल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षःस्थलाम्॥ भास्वन्मौलिनिबद्धचन्द्रशकलामापीन-
तुङ्गस्तनीम्॥ १॥ मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्ताम्बुजे। बिभ्राणां विशदप्र-
भां त्रिनयनां वाग्देवतामाश्रये॥ ललाटे- अं नमः॥ मुखवृत्ते- आं नमः॥ दक्षनेत्रे- इं नमः॥
वामनेत्रे- ईं नमः॥ दक्षकर्णे उं नमः॥ वामकर्णे ऊं नमः॥ दक्षनासापुटे- ऋं नमः॥ वामनासा-
पुटे ॠं नमः॥ दक्षगण्डे ऌं नमः॥ वामगण्डे ॡं नमः॥ ओष्ठे- एं नमः॥ अधरे- ऐं नमः॥
ऊर्ध्वदन्तपङ्क्तौ ओं नमः॥ अधोदन्तपङ्क्तौ औं नमः॥ शिरसि- अं नमः॥ मुखे- अः नमः॥
दक्षबाहुपञ्चसन्ध्यग्रेषु- कं नमः॥ खं नमः॥ गं नमः॥ घं नमः॥ ङं नमः॥ वामबाहुपञ्चसन्ध्य-
ग्रेषु- चं नमः॥ छं नमः॥ जं नमः॥ झं नमः॥ ञं नमः॥ दक्षपादपञ्चसन्ध्यग्रेषु- टं नमः॥ ठं नमः॥
डं नमः॥ ढं नमः॥ णं नमः॥ वामपादपञ्चसन्ध्यग्रेषु- तं नमः॥ थं नमः॥ दं नमः॥ धं नमः॥ नं नमः॥

दक्षपार्श्वे - पँ नमः ॥ वामपार्श्वे - फँ नमः ॥ पृष्ठे - बँ नमः ॥ नाभौ - भँ नमः ॥ उदरे मँ नमः ॥ हृदये -
यँ नमः ॥ दक्षांसे - रँ नमः ॥ ककुदे - लँ नमः ॥ वामांसे - वँ नमः ॥ हृदयादि दक्ष हस्ते शँ नमः ॥
हृदयादि वाम हस्ते षँ नमः ॥ हृदयादि दक्षपादे - सँ नमः ॥ हृदयादि वामपादे हँ नमः ॥
हृदयादि उदरे - ळँ नमः ॥ हृदयादि मुखे क्षँ नमः ॥ इति मातृकान्यासः ॥ अथान्तर्मातृकान्यासः ॥
कण्ठे षोडशस्वरान् रक्तवर्णान् । हृदि कादि ठान्तान् सिन्दूर वर्णान् । नाभौ डादि फान्तान्नीलवर्णान् ॥
लिङ्गे बादि लान्तान् तडिद्वर्णान् । गुदे वादि सान्तान् रक्तवर्णान् भ्रूमध्ये हं क्षं विमलवर्णान्,
सहस्रारे सहस्रदले अकारादि क्षकारान्तान् लाक्षारसवर्णान् पञ्चाशद्वर्णान् । एवं क्रमेण -
द्विरावृत्तौ तृतीयावृत्तौ च विंशत्यावृत्तिपर्य्यन्तं सहस्रधान् न्यसेत् । मूलाधार मारभ्य सहस्रदल -
पर्य्यन्तं सर्व्वत्र सर्व्वदलेषु मूलमन्त्रं न्यसेत् । प्रति दलम्प्रति कमलं प्रति चक्रं कुण्डलिन्या -
गतागतेन एकविंशति शतं जप प्रति श्वासान् भावयेदित्यजपा । अन्तर्मातृकान्यासश्च
सदा सावधानेन कर्तव्यः । इत्यन्तर्मातृकान्यासः ॥ अथ कुलुकान्यासः ॥ ऐं क्लीं ह्रीं श्रीं
भगवति महात्रिपुरसुन्दरि स्वाहा ॥ इति कुलुकां शिरसि । ॐ हृदि सेतुं ह्रीं महासेतुं कण्ठे -
ह्रीं महासेतुं सहस्रारे । ॐ श्रीं अँ ऐँ क्लीं सौः एँ अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ लॄँ एँ ऐँ ओँ -
औँ अँ अः कँ खँ गँ घँ ङँ चँ छँ जँ झँ ञँ टँ ठँ डँ ढँ णँ तँ थँ दँ धँ नँ पँ फँ बँ भँ मँ यँ रँ -
लँ वँ शँ षँ सँ हँ ळँ क्षँ इति निर्व्वाण नाभौ लिङ्गे, कामबीजं जिह्वायां मूलविद्यां विचिन्त्य
यथा शक्ति जपेत् । इति कुलुकान्यासः ॥

अथ पीठ न्यासः। ललाटे अँ कामरूप पीठाय नमः सर्व्वत्र। मुखवृत्ते आँ वाराणसी पीठाय नमः। दक्षनेत्रे इँ नेपाल पीठाय नमः। वामनेत्रे ईं पौण्ड्रवर्द्धन पीठाय नमः। दक्षकर्णे उँ पुरस्तिर पीठाय नमः। वामकर्ण्णे ऊँ कालिकुब्जि पीठाय नमः। दक्षिण नासिकायां ऋँ पूर्णशैल पीठाय नमः। वामनासापुटे ॠँ अर्वुद पीठाय नमः। दक्षगण्डे लृँ आम्रातकेश्वर पीठाय नमः। वामगण्डे लॄँ एकाम्र पीठाय नमः। ओष्ठे एँ त्रिस्रोत पीठाय नमः। अधरे ऐँ कामकोटि पीठाय नमः। ऊर्द्ध्व दन्तपङ्क्तौ ओँ केदार पीठाय नमः। अधो दन्तपङ्क्तौ औँ गुप्तनगर पीठाय नमः। शिरसि अँ चन्द्रपुर पीठाय नमः। मुखे अः श्री पीठाय नमः। दक्षकर पञ्च सन्ध्यग्रेषु - कँ ओंकार पीठाय नमः। खँ जालन्धर पीठाय नमः। गँ मान पीठाय नमः। घँ भद्रकोट पीठाय नमः। ङँ देवीकोट पीठाय नमः॥ वामकर पञ्च सन्ध्यग्रेषु - चँ गोकर्ण पीठाय नमः। छँ मारुतेश्वर पीठाय नमः। जँ मङ्गलकोट पीठाय नमः। झँ अट्टहास पीठाय नमः। ञँ विरज पीठाय नमः। दक्षपाद पञ्च सन्ध्यग्रेषु - टँ राजगृह पीठाय नमः। ठँ महापथ पीठाय नमः। डँ कोणागिरि पीठाय नमः। ढँ एलापुर पीठाय नमः। णँ रामेश्वर पीठाय नमः। वामपाद पञ्च सन्ध्यग्रेषु - तँ जयन्ती पीठाय नमः। थँ उज्जयिनी पीठाय नमः। दँ चरित्री पीठाय नमः। धँ क्षीरिका पीठाय नमः। नँ हस्तिनापुर पीठाय नमः। दक्षपार्श्वे पँ उड्डीश पीठाय नमः। वामपार्श्वे फँ प्रयाग पीठाय नमः। पृष्ठे बँ षष्ठीश पीठाय नमः। नाभौ - भँ मायापुर पीठाय नमः। उदरे मँ निर्ज्जन पीठाय नमः। हृदये - यँ मलय पीठाय नमः।

दक्षांसे रँ श्रीशैलपीठाय नमः। ककुदि- लँ महामेरुपीठाय नमः। वामांसे- वँगिरिपीठाय नमः।। (११)
हृदयादि दक्षहस्त पर्य्यन्ते शँ महेन्द्रपीठाय नमः। हृदयादि वामहस्त पर्य्यन्ते षँ रसेनपीठाय नमः।
हृदयादि दक्षपादपर्य्यन्ते सँ बदरीपीठाय नमः। हृदयादि वामपादपर्य्यन्ते हँ महालक्ष्मीपुर पीठाय नमः
हृदयादि उदर पर्य्यन्तं लँ उड्डीयानपुर पीठाय नमः। हृदयादि मुख पर्य्यन्त क्षँ सौम्यपीठाय नमः।
ततो मूलाधारे ध्यानपीठाय नमः। स्वाधिष्ठाने कामपीठाय नमः। मणिपूरे ज्ञानपीठाय नमः।
अनाहते विदेहपीठाय नमः। विशुद्धौ नन्दिनी पीठाय नमः। आज्ञायां नन्दापीठाय नमः।
ततः सहस्रदलेषु क्षीरनिधि पीठाय नमः। कल्पवनपीठाय नमः। चिन्तामणि पीठाय नमः।
पर्य्यङ्क पीठाय नमः। शिवासन पीठाय नमः। मूर्तिमय पीठाय नमः। सर्व्वव्यापक पीठाय नमः। इतिपीठन्यासः।
अस्य रहस्य न्यासः। अस्य श्री रहस्य न्यास मन्त्रस्य ब्रह्माविष्णुमहेश्वरा ऋषयः ऋग्यजुस्सामानि
छन्दांसि, चैतन्य शक्ति महात्रिपुरसुन्दरी देवता कृताकृत न्यास पूर्णता सिध्दये विनियोगः।
ब्रह्माविष्णु महेश्वर ऋषिभ्यो नमः शिरसि। ऋग्यजुस्सामभ्य छन्दोभ्यो नमः मुखे। चैतन्य शक्ति महा-
त्रिपुर सुन्दर्यै देवतायै नमः हृदये। कृताकृतन्यास पूर्णतासिध्दये विनियोगः- पादयोः।
ऐं क्लीं सौं क्लीं ऐं श्रीं ह्रीं, हं सः सोऽहं सदाशिवासनायै महात्रिपुर सुन्दर्यै नमः मूलाधारे ॥१॥
ऐं क्लीं सौं सौं क्लीं, ऐं श्रीं ह्रीं हं सः सोऽहं रतिप्रियायै महात्रिपुर सुन्दर्यै नमः। इति स्वाधिष्ठाने ।२॥
ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हं सः सोऽहं ज्ञान स्वरूपायै महात्रिपुर सुन्दर्यै नमः इति मणिपूरे ।३।।
ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हं सः सोऽहं ध्यानस्वरूपायै महात्रिपुर सुन्दर्यै नमः इति अनाहते ॥४॥ (१२)
ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोऽहं विशुध्द स्वरूपायै महात्रिपुर सुन्दर्यै नम इति विशुध्दौ ॥५॥
ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोऽहं स्वतन्त्र स्वरूपायै महात्रिपुर सुन्दर्यै नम इत्याज्ञायाम् ॥६॥
ऐं क्लीं सौं सौं क्लीं ऐं श्रीं ह्रीं हंसः सोऽहं आनन्द स्वरूपायै महात्रिपुर सुन्दर्यै नमः। इति सहस्रारे न्यसेत्॥
इति रहस्य न्यासः। अथ काम न्यासः। ह्रीँ कामाय नमः। क्लीं मन्मथाय नमः। ऐं कन्दर्पाय नमः।
ब्लूं मकरध्वजाय नमः। स्त्रीं मीनकेतवे नमः। ततः, ऐं हृदयाय नमः। क्लीं शिरसे स्वाहा।
सौं शिखायै वषट्। ऐं कवचाय हुम्। क्लीं नेत्रत्रयाय वौषट्। सौं अस्त्राय फट्। इति द्विरावृत्तमन्त्रेण-
करयोर्विन्यसेत्। इति काम न्यासः। अथ रत्यादि न्यासः। लिङ्गे ऐं रत्यै नमः। हृदि क्लीं प्रीत्यै नमः।
भ्रूमध्ये सौं मनोभवायै नमः। भ्रूमध्ये सौं अमृतारव्यै नमः। हृदि क्लीं योगिन्यै नमः। लिङ्गे ऐं विश्व-
योन्यै नमः। इति रतिन्यासः।। अथ मनोभव न्यासः। शिरसि ह्सौं ईशानाय नमः। मनोभवाय नमः।
मुखे ह्सौं तत्पुरुषाय मकरध्वजाय नमः। हृदि स्हुं अघोरकुमाराय कन्दर्पाय नमः। गुह्ये ह्स्रीं —
वामदेवाय मन्मथाय नमः। पादयोः- ह्सूं सद्योजाताय कामदेवाय नमः। ऊर्ध्ववक्त्रे मस्तके —
ह्सौं ईशानाय मनोभवाय नमः। पूर्ववक्त्रे भाले ह्सौं तत्पुरुषाय मकरध्वजाय नमः।

दक्षिणवक्त्रे दक्ष कर्णे ह्स्रूं अघोर कुमाराय कन्दर्पाय नमः। उत्तर वक्त्रे वाम कर्णे ह्स्रीं वामदेवाय मन्मथाय
नमः। पश्चिमवक्त्रे चूडाधः ह्स्रूं सद्योजाताय कामदेवाय नमः। इति मन्त्री भवन्यासः। अथ बाणन्यासः।
द्रां क्षोभण बाणाय नमः। द्रीं द्रावण बाणाय नमः। क्लीं आकर्षण बाणाय नमः। ब्लूं मोहन बाणाय नमः।
सः उन्मादन बाणाय नमः। इति अङ्गुष्ठादि कनिष्ठान्तकरयोर्न्यसेत्। इति बाण न्यासः। अथ स्वतन्त्र-
न्यासः। अस्य श्री महात्रिपुर सुन्दरी स्वतन्त्र न्यासस्य आनन्द भैरव ऋषि र्देवी गायत्री छन्दः —
श्री महात्रिपुर सुन्दरी देवता। ऐं बीजम्। सौः शक्तिः। क्लीं कीलकम्। धर्म्मार्थकाममोक्षार्थे विनियोगः।
आनन्द भैरव ~~ऋषये~~ नमः शिरसि। देवी गायत्री छन्दसे नमः मुखे। श्री महात्रिपुर सुन्दरी देवतायै-
नमः हृदये। ऐं बीजाय नमः नाभौ। सौः शक्तये नमः स्वाधिष्ठाने। क्लीं कीलकाय नमः मूलाधारे।
धर्मार्थकाम मोक्षार्थे विनियोगः पादयोः। ऐं ह्रीं क्लीं अङ्गुष्ठाभ्यान्नमः। क्लीं श्रीं सौः ऐं तर्जनी-
भ्यां स्वाहा। सौः औं ह्रीं श्रीं मध्यमाभ्यां वषट्। ऐं क ए ल ह्रीं ह्सकहल ह्रीं अनामिकाभ्यां हुम्।
क्लीं सकल ह्रीं कनिष्ठिकाभ्यां वौषट्। सौः सौः ऐं क्लीं ह्रीं श्रीं करतल कर पृष्ठाभ्यां फट्॥
ऐं ह्रीं श्रीं ऐं क ए ल ह्रीं सर्वज्ञायै महात्रिपुर सुन्दर्यै हृदयाय नमः। ऐं ह्रीं श्रीं क्लीं सकहल ह्रीं-
नित्यतृप्तायै महात्रिपुर सुन्दर्यै शिरसे स्वाहा। ऐं ह्रीं श्रीं सौः सकल ह्रीं अनादि बोधायै महात्रिपुर-
सुन्दर्यै शिखायै वषट्। ऐं ह्रीं श्रीं ऐं क ए ल ह्रीं स्वतन्त्रायै महात्रिपुर सुन्दर्यै कवचाय हुम्॥
ऐं ह्रीं श्रीं क्लीं ह्सकहल ह्रीं नित्यमलुप्त शक्तये महात्रिपुर सुन्दर्यै नेत्रत्रयाय वौषट्॥
ऐं ह्रीं श्रीं सौः सकल ह्रीं अनन्तायै महात्रिपुर सुन्दर्यै अस्त्राय फट्। ह्रः अस्त्राय फट् इति दिग्बन्धः। (९४)
इति स्वतन्त्र न्यासः। अथ चतुर्द्दशार चक्र न्यासः। ऐं शिरसि। क्लीं सौः भ्रुवोः। ऐं ललाटे। क्लीं सौः श्रोत्रयोः।
ऐं भ्रूमध्ये। क्लीं सौः नेत्रयोः। ऐं शिरसि। क्लीं सौः नासिकयोः। ऐं चिबुके क्लीं सौः ओष्ठयोः। ऐं नासिकायां।
क्लीं सौः गण्डयोः। ऐं गले। क्लीं सौः बाहुमूलयोः। ऐं कण्ठे। क्लीं सौः बाह्वोः। ऐं चिबुके। क्लीं सौः स्तनयोः।
ऐं हृदये। क्लीं सौः पार्श्वयोः। ऐं नाभौ। क्लीं सौः स्तनयोः। ऐं हृदये। क्लीं सौः करयोः। ऐं लिङ्गे।
क्लीं सौः त्रिकयोः। ऐं पृष्ठे। क्लीं सौः नितम्बयोः। ऐं क्लीं सौः मूलस्य सर्वाधाराय नमः। इति मूलाधारे।
इति चतुर्द्दशार न्यासः॥ ततो ऽङ्ग देवता न्यासः। अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः क्लीं-
रसिनी वाग्देवतायै नमः शिरसि। कं खं गं घं ङं क्लीं कामेश्वरी वाग्देवतायै नमः ललाटे। चं छं जं झं ञं-
श्रीं मोदिनी वाग्देवतायै नमः मुखे। टं ठं डं ढं णं क्लुं विमलानना वाग्देवतायै नमः कण्ठे। तं थं दं धं नं श्रीं-
अरुणा वाग्देवतायै नमः हृदये। पं फं बं भं मं श्रीं जयिनी वाग्देवतायै नमः नाभौ। यं रं लं वं —
क्ष्मीं वाग्देवतायै नमः मूलाधारे। शं षं सं हं लं सं क्षं हं क्ष्मीं कौलिनी वाग्देवतायै नमः इति पादयोः।
इत्यङ्ग देवता न्यासः॥ अथ मन्त्र न्यासः। प्रथम बीजं शिरसि। द्वितीय बीजं मुखे। तृतीय बीजं-
हृदये॥ ततः समस्त मूलमन्त्रं ~~[illegible]~~ शिरस्तः पाद पर्यन्तन्न्यसेत्॥ इति मन्त्रन्यासं कृत्वा →
पीठ न्यासं कुर्यात्॥

प्रथमं हृदये ऐं आधार शक्ति कमलासनाय नमः। ऐं अनन्ताय नमः। ऐं पृथिव्यै नमः।
ऐं रससमुद्राय नमः। ऐं रत्न द्वीपाय नमः। ऐं कल्पवृक्षाय नमः। ऐं रत्नमण्डलाय नमः।
दक्षस्कन्धे धर्म्माय नमः। वाम स्कन्धे ज्ञानाय नमः। दक्षोरौ वैराग्याय नमः। वामोरौ ऐश्वर्याय-
नमः। मुखे अधर्म्माय नमः। दक्षपार्श्वे अज्ञानाय नमः। वाम पार्श्वे अनैश्वर्याय नमः। नाभौ —
अवैराग्याय नमः। हृदये अनन्ताय नमः। पद्माय नमः। ॐ अर्क मण्डलाय नमः। ॐ सोममण्ड-
लाय नमः। ॐ वह्नि मण्डलाय नमः। सँ सत्त्वाय नमः। रँ रजसे नमः। तँ तमसे नमः। ह्रैं ह्रें ह्रीं-
ह्सौ चक्रासनाय नमः। सत्त्वमन्त्रासनाय नमः। साध्य सिद्धासनाय नमः। ततो हृत्पद्म-
चक्रं ध्यात्वा तदुपरि वेदीं गन्ध पुष्पाक्षतैः कच्छप मुद्राम्बद्ध्वा ध्यायेत्। सकुङ्कुम-
मित्यादि। " बालार्क मण्डला भासाञ्चतुर्बाहुं त्रिलोचनाम्। पाशाङ्कुशौ शरांश्चापन्धारयन्तीं शिवां भजे॥
शिरसि पुष्पं दत्त्वा, गुरुभ्यो नमः। परमगुरुभ्यो नमः। परात्पर गुरुभ्यो नमः। परमेष्ठी गुरुभ्यो नमः।
मनसा देवीं सम्पूज्य आवाहन मुद्रां योनिमुद्राम्प्रदर्श्य ततो ऽर्घ्य स्थापनं कुर्यात्॥ सौः अस्त्राय फट्
इति शङ्खं प्रक्षाल्य भूमौ त्रिकोण मण्डलं कृत्वा ॐ आधार शक्त्यै नमः, कूर्माय नमः, अनन्ताय-
नमः, इति पूजयेत्॥ तदुपरि नम इति प्रक्षालित त्रिपादिकां निधाय तदुपरि शङ्खं निधाय त्रिधा —
मूलेनाप्रर्घ्य दूर्वाक्षतादि निःक्षिप्य मँ दशकलात्मने सूर्यमण्डलाय नमः। इति त्रिपदीं सम्पूज्य (९६)
अँ द्वादश कलात्मने वह्नि मण्डलाय नम इति जले पूजयेत्। उँ सोम मण्डलाय षोडशकलात्मने-
नमः। ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति॥ नर्म्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥
इति सूर्यमण्डला तीर्थमङ्कुश मुद्रयानीय अवगुण्ठन मुद्रया वगुण्ठ्य मूलमष्टधा जप्त्वा योनि-
मुद्राम्प्रदर्श्य, अमृतीकृत्य, धेनु मुद्रया पुनर्मूलमष्टधा जपित्वा तेनोदकेनाऽभ्युक्ष्य, -
स्थापयेदिति। ततो विशेषार्घ्य स्थापनम्। स्वपुरतः किञ्चिद्वामभागे सामान्यार्घ्यस्य तोयेनाभ्युक्ष्य-
त्रिकोण वृत्त गर्भित वृत्तात्मकं षट्कोणवृत्त चतुरस्र मण्डलं कृत्वा अग्न्यादिकोण चतुष्टये पूजयेत्।
ॐ उड्डीयान श्रीपादुकाम्पूजयामि नमः। श्री जालन्धर श्रीपादुकाम्पूजयामि नमः। पूं पूर्णगिरि श्रीपादु-
कां पूजयामि नमः। कां कामरूप श्रीपादुकाम्पूजयामि नमः। मूलेन नमोच्चार्य आधार मण्डलाय नमः
इत्याधारं सम्पूज्य। सौः अस्त्राय फट् नमः। इति त्रिपदीं सम्पूज्य मण्डले स्थापयित्वा पूजयेत्।
मँ वह्नि मण्डलाय दशकलात्मने नमः। ततः सौः अस्त्राय फट् नमः इति शङ्खं प्रक्षाल्य स्थापयित्वा-
अँ सूर्यमण्डलाय द्वादशकलात्मने नमः। श्रीमहात्रिपुर सुन्दर्यर्घ्य पात्राय नमः इति शङ्खं सम्पूज्य।
उँ सोम मण्डलाय षोडश कलात्मने श्रीमहात्रिपुर सुन्दर्यर्घ्यामृताय नम इति जलेनापूर्य तत्र जले -
दूर्वाक्षतादि दत्त्वा ॐ गङ्गे च यमुने चैवेत्यादिना सूर्यमण्डलादङ्कुश मुद्रया तीर्थमावाह्य धेनुमुद्र-
यामृती कृत्य योनिमुद्राम्प्रदर्श्य तदुपरि मूलमष्टधा जपित्वा दक्षाङ्गुष्ठेन जलं स्पृष्ट्वा →

मूलं स्मृत्वा अर्घ्यजलस्य आग्नेयकोणमारभ्य विन्यसेत्। हृदयाय नमः। शिरसे स्वाहा।
शिखायै वौषट्। अस्त्राय फट्। इति चतुर्दिक्षु विन्यस्य 'ह्रीं' इति मन्त्रेण (१७)
सम्पूज्य पञ्चरत्नानि विन्यसेत्। ग्लूं स्लूं प्लूं म्लूं न्लूंमिति पञ्चरत्नानि -
स्वर्ग मर्त्य पाताल गमन रत्नानि विन्यसेत्। मत्स्यमुद्रया च्छाद्य संरक्षण मुद्रया संरक्ष्य,
अवगुण्ठन मुद्रया अवगुण्ठ्य अमृतीकरण मुद्रया अमृती कृत्य प्रबोधन मुद्रया प्रबोध्य, मूलं स्मृत्वा।
अकुलस्थामृताकारे सिद्धिज्ञानकरे परे॥ अमृतत्वं निधे त्वस्मिन् वस्तुनि क्लिन्नरूपिणि॥
इति जलमभिमन्त्र्य तज्जलेनात्मानं पूजोपकरणञ्च प्रोक्ष्य पीठ पूजामारभेत्। 'ऐं ह्रीं नमः'
इति कुम्भजलेन भूमिं शोधयित्वा त्रिपदीमारोप्य पूजयेत्। ऐं आधार शक्ति कमलासनाय नमः,
कूर्म्माय नमः। अनन्ताय नमः। पृथिव्यै रसाम्बुधये नमः। रत्नद्वीपाय नमः। नन्दनोद्यानाय
नमः। रत्नमण्डपाय नमः। रत्नवेदिकायै नमः। रत्नसिंहासनाय नमः। श्रीचक्राय नमः।
ततो ह्रमिति मन्त्रेण ताम्रपीठं विशोध्य श्रीयन्त्रं स्थापयित्वा पीठस्याऽऽग्नेयादि कोण चतुष्टय —
पूजयेत्। धर्म्माय नमः। ज्ञानाय नमः। वैराग्याय नमः। ऐश्वर्य्याय नमः। ततः पूर्वादि -
चतुर्दिक्षु। अधर्म्माय नमः। अज्ञानाय नमः। अवैराग्याय नमः। अनैश्वर्य्याय नमः। पीठस्योपरि-
आनन्दकन्दाय नमः। संविन्नालाय नमः। सर्व्वतत्त्वानुकम्पाय नमः। पञ्चाशद्वर्णकर्णिकायै-
नमः। विकारमय केसरेभ्यो नमः। प्रकृतिमय पत्रेभ्यो नमः। मं वह्निमण्डलाय नमः।
ॐ सूर्य्यमण्डलाय नमः। ॐ सोममण्डलाय नमः। सं सत्त्वाय नमः। रं रजसे नमः।
तं तमसे नमः। आं आत्मने नमः। अं [redacted] अन्तरात्मने नमः। पं परमात्मने नमः। (१८)
ह्रीं ज्ञानात्मने नमः। ऐं कामरूपपीठाय नमः। ऐं पूर्णगिरिपीठाय नमः। ऐं जालन्धरपीठाय नमः। ऐं उड्डीयानपीठाय
नमः। इति सम्पूज्य। ऐं त्रिपुरेश्वरी मध्यमाभ्यां नमः। क्लीं त्रिपुरेश्वरी अनामिकाभ्यां नमः।
सौं त्रिपुरेश्वरी कनिष्ठिकाभ्यां नमः। ऐं त्रिपुरेश्वरी अङ्गुष्ठाभ्यां नमः। क्लीं त्रिपुरेश्वरी तर्जनीभ्यां नमः।
सौं: त्रिपुरेश्वरी करतलकरपृष्ठाभ्यां नमः। ह्रीं क्लीं सौं देव्यासनाय नमः। चक्रासनाय नमः।
सर्व्वमन्त्रासनाय नमः। साध्यसिद्धासनाय नमः। ऐं त्रिपुरेश्वरी हृदयाय नमः। क्लीं त्रिपुरेश्वरी शिरसे स्वाहा।
सौः त्रिपुरेश्वरी शिखायै वषट्। ऐं त्रिपुरेश्वरी कवचाय हुम्। क्लीं त्रिपुरेश्वरी नेत्रत्रयाय वौषट्। सौः त्रिपुरे-
श्वरी अस्त्राय फट्। ततो ध्यात्वा पुष्पाञ्जलिना देवि तेजः समानीय यन्त्रे कल्पितमूर्तौ वा आवाहनमुद्र-
या आवाह्य स्थापनमुद्रया संस्थाप्य त्रिखण्डमुद्रां बद्ध्वा। "महापद्मवनान्तस्थे कारणानन्दविग्रहे -
सर्व्वभूतहिते मातरेह्येहि परमेश्वरि॥" अमृतीकरण परमीकरण मुद्रां प्रदर्श्य मूलमुच्चार्य श्रीमद्-
त्रिपुरसुन्दरी प्राणा इह सुप्रतिष्ठिता भवन्तु। मूलमुच्चार्य पाद्यं नमः। मूलमर्घ्यं नमः।
मूलं गन्धो नमः। मूलं पुष्पं नमः। मूलं धूपो नमः। मूलं दीपो नमः। मूलं नैवेद्यं नमः।
लं पृथिव्यात्मकं गन्धं समर्प्पयामि नमः। हं आकाशात्मकं पुष्पं समर्प्पयामि नमः। यं वाय्वात्मकं —
धूपं समर्प्पयामि नमः। रं वह्न्यात्मकं दीपं समर्प्पयामि नमः। वं अमृतात्मकं अमृतं समर्प्पयामि नमः।
इति पञ्चोपचारान् निवेद्य —

श्रीमहात्रिपुरसुन्दरि तवाज्ञाम्प्राप्य परिवारानर्च्चयामि। आज्ञाम्प्राप्य पूजयेत्। मध्ये-
ह्रीं श्रीं कामेश्वर्य्यै नमः। भगमालिन्यै नमः। क्लिन्नायै नमः। भेरुण्डायै नमः।
विन्ध्यवासिन्यै नमः। महाविद्येश्वर्य्यै नमः। शिवदूत्यै नमः। त्वरितायै नमः। नित्यायै नमः।
नीलपताकायै नमः। विजयायै नमः। श्रियै नमः। सर्व्वमङ्गलायै नमः। ज्वालांशुमालिन्यै नमः।
ह्रीं श्रीं विचित्रायै नमः। इति सम्पूज्य। पूर्वद्वारे गणपतये नमः। पश्चिमद्वारे बम्बटुकाय नमः।
उत्तरद्वारे ह्रीँ दुर्गायै नमः। दक्षिणद्वारे क्षं क्षेत्रपालाय नमः। बाह्यचतुरस्रस्य बाह्ये-
रेखायां पश्चिमादि द्वारचतुष्टये ह्रीं श्रीं अणिमादि सिद्धि श्रीपादुकाम्पूजयामि नमः।
लाघिमासिद्धि म्पूजयामि नमः। महिमासिद्धि म्पूजयामि नमः। ईशासिद्धिम्पूजयामि नमः।
वाय्व्यादि कोण चतुष्टये वशित्व सिद्धिं पूजयामि नमः। प्राकाम्य सिद्धि श्रीम्पूजयामि नमः।
भुक्ति सिद्धि श्रीम्पूजयामि नमः। इच्छासिद्धि श्रीम्पूजयामि नमः। अधस्यात्प्राप्तिसिद्धि-
श्रीम्पूजयामि नमः। ऊर्द्ध्वं सर्व्वकाम सिद्धि म्पूजयामि नमः। मध्य चतुरस्रस्य—
पश्चिमादि द्वारचतुष्टये- ह्रीं श्रीं आं ब्राह्म्यै नमः। ईं माहेश्वर्य्यै नमः।

(२०) ऊँ कौमारी श्रीपादुकाम्पूजयामि नमः। ऋं वैष्णवी श्रीपादुकाम्पूजयामि नमः।
मध्य चतुरस्रस्य वाय्व्यादिकोणे ह्रीं श्रीं लॄं वाराही श्रीपादुकाम्पूजयामि नमः। ऐं इन्द्रा- २०)
णी श्रीपादुकाम्पूजयामि नमः। औं चामुण्डा श्रीपादुकाम्पूजयामि नमः। अः महालक्ष्मी श्रीपादुकां-
पूजयामि नमः। अभ्यन्तर चतुरस्रस्य पश्चिमादि द्वार चतुष्टये द्रां खण्डाक्षमुद्रा श्रीपादुकाम्पूजयामि
नमः। क्लीँ सर्व्व सङ्क्षोभिणी मुद्रा श्रीपादुकां पूजयामि नमः। ह्रीं सर्व्वविद्राविणी मुद्रा श्रीपादुकां
पूजयामि नमः। क्लौँ सर्व्वाकर्षिणी मुद्रा श्रीपादुकाम्पूजयामि नमः। अभ्यन्तर चतुरस्रस्य—
वाय्व्यादि कोण चतुष्टये ब्लूं सर्व्ववशङ्करी मुद्रा श्रीपादुकां पूजयामि नमः। सर्व्वोन्मादकरीमुद्रा-
श्रीपादुकाम्पूजयामि नमः। क्रों महाङ्कुशा मुद्रा श्रीपादुकाम्पूजयामि नमः। ख्फ्रें खेचरीमुद्रा—
श्रीपादुकाम्पूजयामि नमः। ततस्त्रिवलये बीजमुद्रा श्रीपादुकाम्पूजयामि नमः। योनिमुद्रा श्री-
पादुकाम्पूजयामि नमः। चार्व्वाक दर्शनाय नमः। ततो हस्तेनार्घ्य जलङ्गृहीत्वा, अत्र-
त्रैलोक्य मोहन चतुरस्रचक्रे श्रीमहात्रिपुरसुन्दरी समाधिष्ठिते एता ईशित्वाद्याः प्रकट-
योगिन्यः समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्व्वोपचारैः सम्पूजिताः सन्तु,
इति मूलेनार्प्पयेत्। ततः षोडशदलेषु पश्चिम दलादारभ्य देव्याः प्रदक्षिणा क्रमेण—
पूजयेत्। ह्रीं श्रीं अं कामाकर्षिणी नित्याकला श्रीपादुकाम्पूजयामि नमः। आँ बुद्ध्याकर्षिणी-

उ रूपाकर्षिणी श्रीपादुकां पूजयामि नमः।। ऊं स्पर्शाकर्षिणी नित्याकला श्रीपादुकां पूजयामि

(२१) नित्याकला श्रीपादुकाम्पूजयामि नमः।। ऌं अहङ्काराकर्षिणी नित्याकला श्रीपादुकां पूजयामि नमः।
ईं शब्दाकर्षिणी नित्याकला श्रीपादुकाम्पूजयामि। ॠं रसाकर्षिणी नित्याकला श्रीपादुकां पूजयामि
नमः।। ॠं गन्धाकर्षिणी नित्याकला श्रीपादुकां पूजयामि नमः।। ऌं चित्ताकर्षिणी नित्याकला —
श्रीपादुकां पूजयामि नमः।। ॡं धैर्याकर्षिणी नित्याकला श्रीपादुकां पूजयामि नमः।। एं स्मृत्या-
कर्षिणी नित्याकला श्रीपादुकां पूजयामि नमः।। ऐं नामाकर्षिणी नित्याकला श्रीपादुकाम्पूजयामि
नमः।। ओं बीजाकर्षिणी श्रीपादुकाम्पूजयामि नमः।। औं अमृताकर्षिणी नित्याकला श्रीपादुकां पूजयामि
नमः।। अः शरीराकर्षिणी नित्याकला श्रीपादुकाम्पूजयामि नमः।। रेखायाम् - बौद्ध दर्शनाय नमः।।
ततो हस्तेनार्घ्यजलङ्गृहीत्वा। अत्र सर्वाशापरिपूरके षोडशदलचक्रे श्रीमहात्रिपुरसुन्दरी-
समाधिष्ठिते एताः कामाकर्षिण्याद्या गुप्तयोगिन्यः सम्मुद्राः ससिद्धयः सायुधाः सवाहनाः सपरि-
वाराः सर्वोपचारैः पूजिताः सन्तु। इति मूलमन्त्रेण देव्यै निवेदयेत्। ततोष्टदलचक्रे —
पूर्वदलेषु ह्रीं श्रीं कँ खँ गँ घँ ङँ अनङ्गकुसुमादेवी श्रीपादुकाम्पूजयामि नमः।। चँ छँ जँ
झँ ञँ अनङ्गमेखला देवी श्रीपादुकाम्पूजयामि नमः।। टँ ठँ डँ ढँ णँ अनङ्गमदना देवी श्रीपादुकां-
पूजयामि नमः।। तँ थँ दँ धँ नँ अनङ्गमदनातुरा देवी श्रीपादुकाम्पूजयामि नमः।। पँ फँ बँ भँ मँ अनङ्ग-
रेखा देवी श्रीपादुकाम्पूजयामि नमः।। यँ रँ लँ वँ अनङ्गवेगिनी देवी श्रीपादुकाम्पूजयामि नमः।।
शँ षँ सँ हँ अनङ्गाङ्कुशा देवी श्रीपादुकाम्पूजयामि नमः।। ळँ क्षँ अनङ्गमालिनी देवी श्रीपादुकां-
पूजयामि नमः।। अत्र सर्वसङ्क्षोभकेऽष्टदलचक्रे — श्रीमहात्रिपुरसुन्दरीसमाधिष्ठिते एता अनङ्ग-
कुसुमाद्याः गुप्ततरा योगिन्यः सम्मुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः —

(२२) पूजिताः सन्तु इत्यर्घ्यजलेन देव्यै समर्पयेत्। ह्रीं श्रीं सर्वसंक्षोभिणी शक्ति श्री-
पादुकाम्पूजयामि नमः।। सर्वविद्राविणी शक्ति श्रीपादुकाम्पूजयामि नमः।। सर्वाकर्षिणी शक्ति श्रीपादु-
काम्पूजयामि नमः।। सर्वाह्लादिनी शक्ति श्रीपादुकाम्पूजयामि नमः।। सर्वमोहिनी शक्ति श्रीपादुका —
म्पूजयामि नमः।। सर्वस्तम्भिनी शक्ति श्रीपादुकाम्पूजयामि नमः।। सर्वजृम्भणी शक्ति श्री —
पादुकाम्पूजयामि नमः।। सर्ववशङ्करी शक्ति श्रीपादुकाम्पूजयामि नमः।। सर्वरञ्जिनी शक्ति श्री-
पादुकाम्पूजयामि नमः।। सर्वोन्मादिनी शक्ति श्रीपादुकाम्पूजयामि नमः।। सर्वार्थसाधनी-
शक्ति श्रीपादुकाम्पूजयामि नमः।। सर्वाशापरिपूरणी शक्ति श्रीपादुकाम्पूजयामि नमः।।
सर्वमन्त्रमयी शक्ति श्रीपादुकाम्पूजयामि नमः।। सर्वद्वन्द्वक्षयङ्करी शक्ति श्रीपादुकां पूजयामि
नमः।। बहिः :- साङ्ख्य नैय्यायिक दर्शनेभ्यो नमः।। अत्र सौभाग्यदायके चतुर्दश चक्रे-
श्रीमहात्रिपुरसुन्दरी समाधिष्ठिते एताः सर्वसङ्क्षोभिण्याद्याः शक्तयः सम्प्रदाय योगिन्यः
सम्मुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः पूजिताः सन्तु।। इत्या-
र्घ्यजलेन मूलन्देव्यै समर्पयेत्।। ततो बहिर्दशार चक्रे पश्चिमादि दशार्ते पूजयेत्।
ह्रीं श्रीं सर्वसिद्धिप्रदा देवी श्रीपादुकाम्पूजयामि नमः।। सर्वसम्पदा देवी श्रीपादुकाम्पूजयामि नमः।।
सर्वप्रियङ्करी शङ्करी देवी श्रीपादुकाम्पूजयामि नमः।। सर्वमङ्गलकारिणी देवी श्रीपादुकां पूजयामि नमः।।

(२३)

सर्वकामप्रदादेवी श्रीपादुकाम्पूजयामि नमः। सर्वदुःखविमोचनी देवी श्रीपादुकांपूजयामि नमः (२३)
सर्वाङ्गसुन्दरी देवी श्रीपादुकाम्पूजयामि नमः। सर्वमृत्यु विनाशिनी देवी श्रीपादुकां पूजयामि नमः।
सर्वदुःख विनाशिनी देवी श्रीपादुकाम्पूजयामि। सर्वसौभाग्य दायिनी देवी श्रीपादुकां पूजयामि नमः।
अत्र सर्वाशापरिपूरके चक्रे श्रीमहात्रिपुरसुन्दरी समधिष्ठिते एता स्सर्वसिद्धिप्रदाद्या: -
देव्यः कुलकौलिनी योगिन्यः समुद्राः ससिध्दयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः -
सम्पूजिताः सन्तु। इत्यर्घ्यजलेन मूलेन देव्यै समर्पयेत्। ततोऽन्तर्दशार चक्राग्रा दक्षिणान्तं-
यावत् पूजयेत्। क्रौं श्रीं सर्वज्ञादेवी श्रीपादुकाम्पूजयामि नमः। सर्वशक्तिमयी देवी श्री-
पादुकाम्पूजयामि नमः। सर्वैश्वर्यप्रदा देवी श्रीपादुकाम्पूजयामि नमः। सर्वज्ञानमयी देवी-
~~श्रीपादुकां~~ श्रीपादुकाम्पूजयामि नमः। सर्वव्याधि विनाशिनी देवी श्रीपादुकाम्पूजयामि नमः। —
सर्वाधारस्वरूपा परिपूरणी देवी श्रीपादुकाम्पूजयामि नमः। सर्वपापहरा देवी श्रीपादुकां पूजयामि नमः।
सर्वानन्दमयी देवी श्रीपादुकाम्पूजयामि नमः। सर्वान्तर्याम स्वरूपिणी देवी श्रीपादुकां पूजयामि नमः।
सर्वेप्सित फलप्रदा देवी श्रीपादुकाम्पूजयामि नमः। अत्र सर्वरक्षाकरे अन्तर्दशार चक्रे त्रिपुर-
मालिनी श्रीत्रिपुरसुन्दरी समधिष्ठिते एताः सर्वज्ञाद्या निगर्भयोगिन्यः समुद्राः ससिध्दयः -
सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजिताः सन्तु। इत्यर्घ्य जलेन मूलेन देव्यै -
समर्पयेत्। ततोऽष्टार चक्रे चक्रात्पश्चिमादि दक्षिणान्तं यावत् पूजयेत्॥ ह्रीं श्रीं अँ आँ इँ ईँ -
उँ ऊँ ऋँ ॠँ लृँ ॡँ एँ ऐँ ओँ औँ अँ अः वशिनी वाग्देवता श्रीपादुकाम्पूजयामि नमः। (२४)
कँ खँ गँ घँ ङँ कामेश्वरी वाग्देवता श्रीपादुकाम्पूजयामि नमः। चँ छँ जँ झँ ञँ मोदिनी वाग्देवता
श्रीपादुकाम्पूजयामि नमः। टँ ठँ डँ ढँ णँ विमला वाग्देवी देवता श्रीपादुकाम्पूजयामि नमः। तँ थँ दँ धँ नँ अरु-
णा वाग्देवता श्री पादुकां पूजयामि नमः। पँ फँ बँ भँ मँ जयिनी वाग्देवता श्रीपादुकाम्पूजयामि नमः।
यँ रँ लँ वँ सर्वेश्वरी वाग्देवता श्रीपादुकाम्पूजयामि नमः। शँ षँ सँ हँ क्षँ कौलिनी वाग्देवता —
श्रीपादुकाम्पूजयामि नमः। अत्र सर्वरोगहरे अष्टार चक्रे श्रीमहात्रिपुरसुन्दरी समधिष्ठि-
ते एता वशिन्याद्या रहस्य योगिन्यः समुद्राः ससिध्दयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः —
सम्पूजिताः सन्तु, इत्यर्घ्य जलेन मूलेन देव्यै समर्पयेत्। अभ्यन्तर कोण त्रये पुष्पाञ्जलिं वारत्रयन्दद्यात्।
चक्रमध्ये दक्षिणे उत्तम बाणाय नमः। वामे मोहधनुषे नमः। तदधः कर्कशाय नमः। दक्षिणे स्तम्भाङ्कुशाय नमः।
अग्रे क्लीं कामेश्वर्यै नमः। ओं चक्रिण्यै नमः। ऐं भगमालिन्यै नमः। मूलेन श्रीमहात्रिपुरसुन्दर्यै नमः।
ततः त्रिकोण मध्ये कामकला मीकार रूपां ध्यायेत्। ततो ब्रह्मविष्णु रुद्रेशान सदाशिवेभ्यः पञ्चप्रेतेभ्यो-
नमः। नवग्रहेभ्यो नम इत्यभ्यर्च्य मालाङ्गृहीत्वा यथाशक्ति जपेत्। ततः "गुह्यातिगुह्यगोप्त्री त्वङ्-
गृहाणास्मत्कृतञ्जपम्। सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि॥" इति जलेन देव्या वामहस्ते →

सम्मर्प्पयेत्। जपन्देव्या गृहीत न्तेजोमयं विभाव्य। विधिहीनक्रियाहीनम्भक्तिहीनञ्च —
यद्भवेत्। पूर्णं भवतु तत्सर्व्वं त्वत्प्रसादात्रिलोचने॥" इति यथाशक्ति स्तुत्वा इदाक्षिणमात्रैः प्रण —
म्य कृतार्थमात्मानम्भावयेत्। योनिमुद्राम्प्रदर्श्य येत्। संहारमुद्रया विसर्ज्जयेत्। निर्माल्यं —
गृहीत्वा ऐशान्यान्त्रिकोणमण्डलं कृत्वा ऐं चँ चण्डेश्वर्यै नमः इत्यभ्यर्च्य निर्माल्यं —
शिरसि धृत्वा यथासुखं विहरेत्। श्रीविद्याज्ञानमात्रेण सर्वसिद्धिः प्रजायते। अतो विद्या —
प्रदातव्या नाभक्ताय कदाचन इति पूजा पद्धतिः॥ पूजाविधौ विशेषः [यस्मिन् चक्रे मडे शानि केशराणि प्रकल्पये [?]॥ यानि सा हितानि तस्य ईशानं कर्णानि भैरवा॥ इत्युक्त्या नात्र केशराणि कर्णिकायाणि॥]

॥अथ स्तोत्रम्॥ [श्रीविद्यास्तोत्रम्]

कल्याणवृष्टिभिरिवामृतपूरिताभिर्लक्ष्मीस्वयंवरणमङ्गलदीपिकाभिः।
सेवाभिरम्ब तव पादसरोजमूले नाकारि किम्मनसि भक्तिमताञ्जनानाम्॥१॥
एतावदेव जननि स्पृहणीयमास्ते त्वद्वन्दनेषु सलिलस्य सरोजनेत्रे॥
सान्निध्यमुद्यदरुणाम्बुजसोदरस्य त्वद्विग्रहस्य सुधया परयाप्लुतस्य॥२॥
ईषत्प्रभावकलुषाः कति नाम सन्ति ब्रह्मादयः प्रतिदिनम्प्रलयाभिभूताः।
एक स्स एव जननि स्थिरसिद्धिरास्ते यः पादयोस्तव सकृत्प्रणतिङ्करोति॥३॥
लब्ध्वा सकृत्त्रिपुरसुन्दरि तावकीनङ्कारुण्यकन्दलितकान्तिभरङ्कटाक्षम्।
कन्दर्पभावसुभगास्त्वयि भक्तिभाजः सम्मोहयन्ति तरुणीम्भुवनत्रयेऽपि॥४॥

ह्रीङ्कारमेव तव नाम गृह्णन्ति ये वा मातस्त्रिकोणनिलये त्रिपुरे त्रिनेत्रे।
त्वत्संस्मृतौ यमभयाभिभवं विहाय दीव्यन्ति नन्दनवने सह लोकपालैः॥५॥
हन्तुः पुरामधिगलम्परिपूर्णमानः क्रूरः कथन्न भविता गरलस्य वेगः।
नाश्वासनाय यदि मातरिदन्तवार्द्धं देहस्य शश्वदमृताप्लुतशीतलस्य॥६॥
सर्व्वज्ञतां सदसि वाक्पटुताम्प्रसूते देवि त्वदङ्घ्रिसरसीरुहयोः प्रणामः।
किञ्च स्फुरन्मुकुटमुज्ज्वलमातपत्रन्द्वे चामरे च महतीं वसुधान्दधाति॥७॥
कल्पद्रुमैरभिमतप्रतिपादनेषु कारुण्यवारिधिभिरम्ब भवत्कटाक्षैः॥
आलोकय त्रिपुरसुन्दरि मामनाथन्त्वय्येव भक्तिभरितन्त्वयि बद्धदृष्टिम्॥८॥
हन्तेतरेष्वपि निधाय मनांसि चान्ये भक्तिं वहन्ति किल सा परदेवतेषु॥
त्वामेव देवि मनसाऽनुस्मरामि त्वामेव नौमि शरणञ्जननि त्वमेव॥९॥
लक्षेषु सत्स्वपि तवाक्षि विलोकनानामालोकय त्रिपुरसुन्दरि माङ्कदाचित्।
नूनं मयाच सदृशः करुणैकपात्रञ्जातो जनिष्यति जनो न च जायते वा॥१०॥
ह्रीं ह्रीमिति प्रतिदिनञ्जपतान्तवाख्याङ्किन्नाम दुर्लभमिह त्रिपुराभिधाने॥
मालाकिरीटमदवारणमाननीयाँस्तान्सेवते मधुमती स्वयमेव लक्ष्मीः॥११॥

सम्पत्कराणि सकलेन्द्रिय नन्दनानि साम्राज्य दान कुशलानि सरोरुहाक्षि।
त्वद्वन्दनानि दुरितोद्धरणोद्यतानि मामेव मातरनिशं कलयन्तु नान्यम्॥१२॥
कल्पोपसंहरण कल्पित ताण्डवस्य देवस्य खण्डपरशोः परभैरवस्य॥
पाशाङ्कुशैक्षवशरासन पुष्पबाणा: सा साक्षिणी विजयते तव मूर्ति रेका॥१३॥
लग्नं सदा भवतु मातरिदं त्वदीयं तेजः परं बहुल कुङ्कुम पङ्क शोणम्।
भास्वत् किरीट ममृतांशु कलावतंसं मध्ये त्रिकोण मुदितं परमामृताक्तम्॥१४॥
ह्रीङ्कार त्रय सम्पुटेन महता मन्त्रेण सन्दीपितं स्तोत्रं यः प्रतिवासरं तव पुरो मात-
र्जपेन्मन्त्रवत्। तस्य क्षोणिभुजो भजन्ति वशगा लक्ष्मी स्थिरं स्थायिनी।
वाणी निर्मल सूक्ति भाव भरिता जागर्ति दीर्घं यशः॥ १५॥ इति ब्रह्मविरचितं षोडशी कल्याणी-
स्तोत्रं विक्रम सम्वत् २०३९ माघ मासस्य ८ दिवसे श्रीपशुपति देवपत्तन निवासी पं. लोकनाथ-
आचार्य-धर्मशास्त्रिणा लिखितं शुभं भूयात्॥

आयुर्यज्ञेन। कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्रोत्रं यज्ञेन कल्पतां वाग्यज्ञेन-
कल्पतां मनो यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां ब्रह्मा यज्ञेन कल्पतां ज्योतिर्यज्ञेन-
कल्पतां स्वर्यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्॥ स्तोमश्च-
यजुश्च ऋक्च साम च बृहच्च रथन्तरञ्च॥ स्वर्देवा अगन्मामृता अभूम प्रजापतेः-
प्रजा अभूम वेट् स्वाहा॥ २९॥ [११] इति रुद्रे अष्टमोऽध्यायः॥ ८॥ अथ शान्तिपाठः॥
ऋचं वाचम्०॥१॥ यन्मे छिद्रम्॥२॥ भूर्भुवः स्वः॥३॥ कया नश्चित्र आभुवत्॥४॥ कस्त्वा॥५॥
अभीषुणः सखीनामविता०॥६॥ कया त्वन्न ऊत्या०॥७॥ इन्द्रो विश्वस्य राजति॥८॥ शन्नो मित्रः शं वरुणः॥९॥
शन्नो वातः॥१०॥ अहानि शम्॥११॥ शन्नो देवीः॥१२॥ स्योना पृथिवि॥१३॥ आपो हि ष्ठा०॥१४॥
यो वः शिवतमो रसः०॥१५॥ तस्मा अरं०॥१६॥ द्यौः शान्तिः॥१७॥ दृते दृंह मा०॥१८॥
दृते दृंह मा॥१९॥ नमस्ते हरसे०॥२०॥ नमस्ते अस्तु विद्युते०॥२१॥ यतो यतः॥२२॥
सुमित्रिया न आप ओषधयः॥२३॥ तच्चक्षुर्देवहितम्॥२४॥ इति शान्त्यध्यायः॥
अथ रुद्रे स्वस्तिप्रार्थना मन्त्राः।—
हरिः ॐ स्वस्ति न इन्द्रो०॥१॥ पयः पृथिव्याम्॥२॥ विष्णो रराटमसि॥३॥ अग्निर्देवता०॥४॥ सद्योजातम्॥५॥
वामदेवाय नमो ज्येष्ठाय नमः॥६॥ अघोरेभ्यो०॥७॥ तत्पुरुषाय०॥८॥ ईशानः सर्वविद्यानाम्॥९॥
शिवो नामासि॥१०॥ ॐ विश्वानि देव सवितः॥११॥ ॐ द्यौः शान्तिः॥१२॥ ॐ सर्वेषां वा एष वेदा-
नां रसो यत्साम सर्वेषामेवैनमेतद् वेदानां रसेनाभिषिञ्चति॥१३॥ इति स्वस्तिप्रार्थना॥

व्रीहयश्च मे देवाऽ इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१७॥ पृथिवी च मऽ इन्द्रश्च मेऽन्तरिक्षञ्च मऽ
इन्द्रश्च मे द्यौश्च मऽ इन्द्रश्च मे समाश्च मऽ इन्द्रश्च मे नक्षत्राणि च मऽ इन्द्रश्च मे-
दिशश्च मऽ इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१८॥ [नमस्ते०५] अꣳशुश्च मे रश्मिश्च मे-
ऽदाभ्यश्च मेऽधिपतिश्च मऽ उपाꣳशुश्च मेऽन्तर्यामश्च मऽ ऐन्द्रवायवश्च मे मैत्रा-
वरुणश्च मऽ आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥१९॥
आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मऽ ऐन्द्राग्नश्च मे महावैश्वदेवश्च मे
~~ध्रुवश्च मे वैश्वानरश्च मऽ ऐन्द्राग्नश्च मे~~ मरुत्वतीयाश्च मे निष्केवल्यश्च मे सावित्र-
श्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥२०॥ स्रुचश्च मे
चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च
मऽ आधवनीयश्च मे वेदिश्च मे बर्हिश्च मेऽवभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम्
(०६) ॥२१॥ [नमस्ते-६] अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च
मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मेऽङ्गुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम्
॥२२॥ व्रतञ्च मऽ ऋतवश्च मे तपश्च मे संवत्सरश्च मेऽहोरात्रेऽ ऊर्वष्ठीवे बृहद्रथन्तरे च मे
यज्ञेन कल्पन्ताम् ॥२३॥ [नमस्ते०७] एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे-
सप्त च मे सप्त च मे नव च मे नव च मऽ एकादश च मऽ एकादश च मे त्रयोदश च मे त्रयोदश च मे
पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च मऽ एकविꣳ-
शतिश्च मऽ एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे पञ्च-
विꣳशतिश्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च मे नवविꣳशतिश्च मऽ एक-
त्रिꣳशच्च मऽ एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥२४॥ [नमस्ते०८] ।
चतस्रश्च मेऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश च मे षोडश च मे षोडश च मे विꣳशतिश्च मे विꣳ-
शतिश्च मे चतुर्विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे-
द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चत्वारिꣳशच्च मे-
चतुश्चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥२५॥ न०९)
त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे-
त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम् ॥२६॥ पष्ठवाट् च मे पष्ठौही च मऽ उक्षा-
च मे वशा च मऽ ऋषभश्च मे वेहच्च मेऽनड्वांश्च मे धेनुश्च मे यज्ञेन कल्पन्ताम् ॥२७॥ [नमस्ते०१०]
वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहाहर्पतये स्वाहाह्ने मुग्धाय स्वाहा
मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिनऽ आन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वा-
(७६) हाधिपतये स्वाहा प्रजापतये स्वाहा ॥ इयन्ते राण्मित्राय यन्तासि यमनऽ ऊर्जे त्वा वृष्ट्यै त्वा प्रजानान्त्वा-
धिपत्याय ॥२८॥

प्राणश्चमेऽपानश्च मे व्यानश्च मे सुश्च मे चित्तञ्च मेऽ आधीतञ्च मे वाक् च मे मनश्च मे चक्षुश्च मे-
श्रोत्रञ्च मे दक्षश्च मे बलञ्च मे यज्ञेन कल्पन्ताम्॥ २॥ ओजश्च मे सहश्च मेऽ आत्मा च मे
तनूश्च मे शर्म्म च मे वर्म्म च मेऽङ्गानि च मेऽस्थीनि च मे परूᳫंषि च मे शरीराणि च मेऽ आयुश्च मे
जरा च मे यज्ञेन कल्पन्ताम्॥ ३॥ ज्यैष्ठ्यञ्च॥ मेऽ आधिपत्यञ्च मे मन्युश्च मे भामश्च मेऽमश्च
मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे
वृद्धिश्च मे यज्ञेन कल्पन्ताम्॥ ४॥ [नमस्ते० १] - सत्यञ्च॥ मे श्रद्धा च मे जगच्च मे धनञ्च मे -
विश्वञ्च मे महश्च मे क्रीडा च मे मोदश्च मे जातञ्च मे जनिष्यमाणञ्च मे सूक्तञ्च मे सुकृ-
तञ्च मे यज्ञेन कल्पन्ताम्॥ ५॥ ऋतञ्च। मेऽमृतञ्च मे यक्ष्मञ्च मेऽनामयच्च मे जीवातुश्च
मे दीर्घायुत्वञ्च मेऽनमित्रञ्च मेऽभयञ्च मे सुखञ्च मे शयनञ्च मे सूषाश्च मे सुदिनञ्च
ञ्च मे यज्ञेन कल्पन्ताम्॥ ६॥ यन्ता च मे धर्त्ता च मे क्षेमश्च मे धृतिश्च मे विश्वञ्च मे
महश्च मे संविच्च मे ज्ञात्रञ्च मे सूश्च मे प्रसूश्च मे सीरञ्च मे लयश्च मे यज्ञेन -
कल्पन्ताम्॥ ७॥ शञ्च। मे मयश्च मे प्रियञ्च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे-
भगश्च मे द्रविणञ्च मे भद्रञ्च मे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम्॥ ८
(६६) [नमस्ते० २]॥ ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतञ्च मे मधु च मे सग्धिश्च मे -
सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रञ्च मेऽ औद्भिद्यञ्च मे यज्ञेन कल्पन्ताम्॥ ९॥
रयिश्च। मे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्णञ्च मे पूर्णतरञ्च मे -
कुयवञ्च मेऽक्षितञ्च मेऽन्नञ्च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम्॥ १०॥ वित्तञ्च। मे वेद्यञ्च मे -
भूतञ्च मे भविष्यच्च मे सुगञ्च मे सुपथ्यञ्च मऽ ऋद्धञ्च मऽ ऋद्धिश्च मे क्लृप्तञ्च मे
क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम्॥ ११॥ व्रीहयश्च। मे यवाश्च मे माषा-
श्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च
गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम्॥ १२॥ [नमस्ते० ३] अश्मा च। मे मृत्तिका च मे -
गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मेऽयश्च मे श्यामञ्च
ञ्च मे लोहञ्च मे सीसञ्च मे त्रपु च मे यज्ञेन कल्पन्ताम्॥ १३॥ अग्निश्च। मऽ आपश्च मे वीरुध-
श्च मऽ ओषधयश्च मे कृष्टपच्याश्च मेऽकृष्टपच्याश्च मे ग्राम्याश्च मे पशवऽ आरण्याश्च मे
वित्तञ्च मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे यज्ञेन कल्पन्ताम्॥ १४॥ वसु च। मे वसतिश्च मे
कर्म्म च मे शक्तिश्च मेऽर्थश्च मऽ एमश्च मऽ इत्या च मे गतिश्च मे यज्ञेन कल्पन्ताम्॥ १५॥ [नमस्ते० ४]
अग्निश्च। मऽ इन्द्रश्च मे सोमश्च मऽ इन्द्रश्च मे सविता च मऽ इन्द्रश्च मे सरस्वती च मऽ इन्द्रश्च मे
पूषा च मऽ इन्द्रश्च मे बृहस्पतिश्च मऽ इन्द्रश्च मे यज्ञेन कल्पन्ताम्॥ १६॥ मित्रश्च। मऽ इन्द्रश्च
(६६) मे वरुणश्च मऽ इन्द्रश्च मे धाता च मऽ इन्द्रश्च मे त्वष्टा च मऽ इन्द्रश्च मे मरुतश्च मऽ इन्द्रश्च मे-

नम्बिकया तञ्जुषस्व स्वाहैषतेरुद्र भागऽआखुस्ते पशुः॥२॥ अवरुद्रमदीमह्यव
देवन्त्र्यम्बकम्॥ यथानो व्वस्यसस्करद्यथानः श्रेयसस्करद्यथानो व्यवसाययात्॥३॥
भेषजमसि भेषजङ्गवेऽश्वाय पुरुषाय भेषजम्॥ सुखम्मेषाय मेष्यै॥४॥ त्र्यम्बकं
यजामहे। सुगन्धिम्पुष्टिवर्द्धनम्॥ उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमा
मृतात्॥ त्र्यम्बकं यजामहे सुगन्धिम्पतिवेदनम्॥ उर्व्वारुकमिव बन्धनादितो
मुक्षीयमामुतः॥५॥ एतत्ते। रुद्रावसन्तेन परो मूजवतोतीहि॥ अवततधन्वा पिनाकावसः
कृत्तिवासाऽअहिंसन्नः शिवोतीहि॥६॥ त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुष-
न्तन्नोऽअस्तु त्र्यायुषम्॥७॥ शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मामाहिंसीः॥
निवर्त्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय॥८॥ इति तृतीयोध्यायः॥
हरिः ॐ॥ उग्रश्च। भीमश्च ध्वान्तश्च धुनिश्च॥ सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा॥१॥
अग्निꣳ हृदयेनाशनिꣳ हृदयाग्रेण पशुपतिङ्कृत्स्नहृदयेन भवं यक्ना॥ शर्व्वम्मतस्नाभ्यामीशान-
(२६) म्मन्युना महादेवमन्तः पर्शव्येनोग्रन्देवं व्वनिष्ठुना व्वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम्॥२॥
उग्रँल्लोहितेन मित्रꣳ सौव्रत्येन रुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीडेन मरुतो बलेन साध्यान्प्रमुदा॥
भवस्य कण्ठ्यꣳ रुद्रस्यान्तः पार्श्व्यम्महादेवस्य यकृच्छर्व्वस्य व्वनिष्ठुः पशुपतेः पुरीतत्॥३॥
इमामेऽअग्नऽइष्टका धेनवः सन्त्वेका च दश च दश च शतञ्च शतञ्च सहस्रञ्च सहस्रञ्चायुतञ्चायुत-
ञ्च नियुतञ्च नियुतञ्च प्रयुतञ्चार्बुदञ्च न्यर्बुदञ्च समुद्रश्च मध्यञ्चान्तश्च परार्द्धश्चैता मेऽ
अग्नऽइष्टका धेनवः सन्त्वमुत्रामुष्मिँल्लोके॥४॥ लोमभ्यः स्वाहा॥ लोमभ्यः स्वाहा त्वचे स्वाहा
त्वचे स्वाहा लोहिताय स्वाहा लोहिताय स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा॥ माꣳसेभ्यः स्वाहा माꣳसे-
भ्यः स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहा स्थभ्यः स्वाहा स्थभ्यः स्वाहा मज्जभ्यः स्वाहा
मज्जभ्यः स्वाहा॥ रेतसे स्वाहा पायवे स्वाहा॥५॥ आयासाय स्वाहा। प्रायासाय स्वाहा संयासाय स्वाहा
वियासाय स्वाहोद्यासाय स्वाहा॥ शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा॥६॥
तपसे स्वाहा। तप्यते स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा घर्म्माय स्वाहा। निष्कृत्यै स्वाहा प्रायश्चित्त्यै
स्वाहा भेषजाय स्वाहा॥१०॥ यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा॥ ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा
विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा॥११॥ इति सप्तमोऽध्यायः॥
हरिः ॐ॥ वाजश्च। मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे
(६६) श्लोकश्च मे श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम्॥१॥

यऽस्तावन्तश्च भूया छंसश्चादिशों रुद्रा वितस्थिरे ॥ तेषा छं सहस्रयोजने वधन्न्वा नितन्मसि ॥६३॥
नमोऽस्तु । रुद्रेभ्यो येदिवियेषां व्वर्षमिषवः ॥ तेब्भ्योदशप्प्राचीर्द्दशदाक्षिणादश प्प्रतीचीर्द्दशो
दीचीर्द्दशोर्द्ध्वाः ॥ तेब्भ्यो नमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुते यान्द्विष्मोयश्चनो द्वेष्टितमेषाञ्जम्भे
दद्ध्मः ॥६४॥ नमोऽस्तु । रुद्रेब्भ्यो येन्तरिक्षे येषांव्वातऽइषवः ॥ तेब्भ्योदश प्प्राचीर्द्द
शदाक्षिणा दशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः ॥ तेबभ्योनमोऽ अस्तुतेनोंवन्तुतेनो मृडयन्तुते
यान्द्विष्मो यश्चनो द्वेष्टितमेषाञ्जम्भे दद्ध्मः ॥६५॥ नमोऽस्तु । रुद्रेब्भ्यो येपृथिव्व्यां येषा
मन्न मिषवः ॥ तेब्भ्योदश प्प्राचीर्द्दशदाक्षिणा दशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः ॥ तेब्भ्योन
मोऽअस्तुतेनोंवन्तुतेनों मृडयन्तु तेयान्द्विष्मो यश्चनो द्वेष्टितमेषाञ्जम्भे दद्ध्मः ॥६६॥

॥ इति शतरुद्रीये पञ्चमोऽध्यायः ॥

पुनर्न्नमस्ते षोडशर्चं जप्त्वा ॥ ॥अथषष्ठोऽध्यायः॥ ॐ एषते रुद्र भागः सहस्वस्राम्बिकया तञ्जुषस्व स्वाहैषते
रुद्र भागऽ आखुस्ते पशुः ॥१॥ अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम् ॥ यथानो व्व
(३६) स्यसस्करद्यथानः श्रेयसस्करद्यथानोव्व्यवसाययात् ॥२॥ नमस्ते रुद्रमन्यवऽ

उतोतऽइषवे नमः ॥ बाहुब्भ्यामुतते नमः ॥३॥ यातेरुद्रशिवातनूरघोरापापका
शिनी ॥ तयानस्तन्न्वाशन्तमया गिरिशन्ताभिचाकशीहि ॥४॥ नतम्बिदाय इमाऽ
इमाजजानान्यद्युष्माकमन्तरम्बभूव ॥ नीहारेणप्प्रावृताजल्प्याचासुतृपऽउक्थ
शासश्चरन्ति ॥५॥ व्विश्वकर्म्माह्यजनिष्टदेवऽआदिद्गन्धर्व्वो अभवद्द्वितीयः ॥
तृतीयः पिताजनितौषधीनामपाङ्गर्ब्भं व्व्यदधात्पुरुत्रा ॥६॥ मीढुष्टमशिवतम
शिवोनः सुमनाभव ॥ परमेव्वृक्षऽआयुधन्निधायकृत्तिं व्वसानऽ आचरपिनाक
म्बिभ्रदागहि ॥७॥ व्विकिरिद्र व्विलोहितनमस्तेऽअस्तुभगवः ॥ यास्तेसह
स्रंहेतयोन्यमस्मान्निवपन्तुताः ॥८॥ सहस्राणिसहस्रशो बाह्वोस्तवहेतयः ॥
तासामीशानो भगवः पराचीनामुखाकृधि ॥९॥ असंख्याता सहस्राणि येरुद्राऽ
अधिभूम्याम् ॥ तेषा छं सहस्रयोजनेवधन्न्वा नितन्मसि ॥१०॥ व्वय छं सोमव्व्रतेत
वमनस्तनूषु व्विब्भ्रतः ॥ प्रजावन्तः सचेमहि ॥११॥ एषते रुद्र भागः सहस्वस्रा

नमः शुष्क्याय च हरित्याय च नमः पाᳫंसव्याय च रजस्याय च नमो लोप्याय चोलप्या-
य च नमऽ ऊर्व्याय च सूर्म्याय च नमः पर्ण्णाय च ॥४५॥ नमः पर्ण्णाय च पर्ण्णश-
दाय च नमऽ उद्गुरमाणाय चाभिघ्नते च नमऽ आखिदते च प्रखिदते च नमऽ इषु-
कृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाᳫं हृदयेभ्यो नमो वि-
चिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽ आनिर्हतेभ्यः ॥४६॥ द्रापेऽ अन्धसस्पते
दरिद्र नीललोहित ॥ आसां प्रजानामेषां पशूनाम्मा भेर्म्मा रोङ्मो च नः किं-
चनाममत् ॥४७॥ इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहे मतीः ॥
यथा शमसद्द्विपदे चतुष्पदे विश्वम्पुष्टं ग्रामेऽ अस्मिन्ननातुरम् ॥४८॥ या ते
रुद्र शिवा तनूः शिवा विश्वाहा भेषजी ॥ शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥४९॥
परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्म्मतिरघायोः ॥ अवस्थिरा मघवद्भ्यस्त-
नुष्व मीढ्वस्तोकाय तनयाय मृड ॥५०॥ मीढुष्टम शिवतम शिवो नः सुमना भव ॥

(२६)

परमे वृक्षऽ आयुधन्निधाय कृत्तिं वसानऽ आचर पिनाकम्बिभ्रदागहि ॥५१॥

विकिरिद्र विलोहित नमस्तेऽ अस्तु भगवः ॥ यास्ते सहस्रᳫं हेतयोन्यमस्मन्निवपन्तु ताः ॥५२॥
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ॥ तासामीशानो भगवः पराचीना मुखा कृधि ॥५३॥ असंख्-
ख्याता सहस्राणि ये रुद्राऽ अधि भूम्याम् ॥ तेषाᳫं सहस्रयोजनेव धन्वानि तन्मसि ॥५४॥ अस्मि-
न्महत्यर्ण्णवेन्तरिक्षे भवाऽ अधि ॥ तेषाᳫं सहस्रयोजनेव धन्वानि तन्मसि ॥५५॥ नीलग्रीवाः
शितिकण्ठा दिवᳫं रुद्राऽ उपाश्रिताः ॥ तेषाᳫं सहस्रयोजनेव धन्वानि तन्मसि ॥५६॥ नीलग्रीवाः
शितिकण्ठाः शर्वाऽ अधः क्षमाचराः ॥ तेषाᳫं सहस्रयोजनेव धन्वानि तन्मसि ॥५७॥ ये वृक्षेषु
शष्पिञ्जरा नीलग्रीवा विलोहिताः ॥ तेषाᳫं सहस्रयोजनेव धन्वानि तन्मसि ॥५८॥ ये भू-
तानामधिपतयो विशिखासः कपर्द्दिनः ॥ तेषाᳫं सहस्रयोजनेव धन्वानि तन्मसि ॥५९॥
ये पथाम्पथिरक्षयऽ ऐलबृदाऽ आयुर्युधः ॥ तेषाᳫं सहस्रयोजनेव धन्वानि तन्मसि ॥६०॥
(६६) ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ॥ तेषाᳫं सहस्रयोजनेव धन्वानि तन्मसि ॥६१॥
येन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ॥ तेषाᳫं सहस्रयोजनेव धन्वानि तन्मसि ॥६२॥

~~[illegible]~~

नमः श्लोक्याय चावसान्याय च नम उर्व्वर्य्याय च खल्याय च नमो वन्याय ॥ ३३॥
नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम आशुषेणाय
चाशुरथाय च नमः शूराय चावभेदिने च नमो विल्मिने ॥ ३४॥ नमो विल्मिने
च कवचिने च नमो वर्म्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो
दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे ॥ ३५॥ नमो धृष्णवे च प्रमृशाय च नमो
निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ॥ ३६॥
नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्या-
य च नमो नादेयाय च वैशन्ताय च नमः कूप्याय ॥ ३७॥ नमः कूप्याय चाव-
ट्याय च नमो वीध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो व-
(०,१)

र्ष्याय चावर्ष्याय च नमो वात्याय ॥ ३८॥ नमो वात्याय च रेष्म्याय च नमो
वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च
नमः शङ्गवे ॥ ३९॥ नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च नमो
ग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो
नमस्ताराय ॥ ४०॥ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च
नमः शिवाय च शिवतराय च ॥ ४१॥ नमः पार्य्याय चावार्य्याय च नमः प्रतरणाय
चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च न-
मः सिकत्याय च ॥ ४२॥ नमः सिकत्याय च प्रवाह्याय च नमः किंशिलाय च
क्षयणाय च नमः कपर्द्दिने च पुलस्तये च नम इरिण्याय च प्रपथ्याय च नमो
व्रज्याय ॥ ४३॥ नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो
(७६) हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च नमः शुष्क्याय ॥ ४४॥

सृकायिभ्यो जिघांसद्भ्यो मुष्णताम्पतये नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्ता-
नाम्पतये नमः ॥२१॥ नम उष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमो नम इषुम-
द्भ्यो धन्वायिभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो
नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमो नमो विसृजद्भ्यः ॥२२॥ नमो विसृजद्-
भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्य
आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः ॥२३॥
नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो
नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृंहतीभ्य-
श्च वो नमो नमो गणेभ्यः ॥२४॥ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो
व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो वि-
(६१) श्वरूपेभ्यश्च वो नमो नमः सेनाभ्यः ॥२५॥ नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो

रथिभ्योऽअरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो
महद्भ्योऽअर्भकेभ्यश्च वो नमः ॥२६॥ नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो
नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः
श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्यः ॥२७॥ नमः श्वभ्यः श्वपतिभ्यश्च वो न-
मो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शिति-
कण्ठाय च नमः कपर्दिने ॥२८॥ नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय
च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते
च नमो ह्रस्वाय ॥२९॥ नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृ-
द्धाय च सवृधे च नमो ग्र्याय च प्रथमाय च नम आशवे ॥३०॥ नम आशवे चाजि-
राय च नमः शीघ्र्याय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमो ना-
देयाय च द्वीप्याय च ॥३१॥ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापर-
जाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च नमः
(६२) सोभ्याय ॥३२॥ नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च